श्रीमन्मोहन-यशःस्मारकग्रन्थमाला ग्रन्थाङ्क २१

तपागच्छगगनाङ्गणदिनमणि श्रीसोमसुन्दरसूरिविनेयवर श्रीजयचन्द्रसूरिरचितः

# प्रतिक्रमणहेतुगर्भः ।

संशोधकः सम्पादकश्च—

श्रीखरतरगच्छविभूषण क्रियोद्धारक श्रीमन्मोहनलालजीमुनिवरविनेयविनेय—स्व० अनुयोगाचार्य श्रीमत्केशरमुनिजीगणिवरविनेयो

बुद्धिसागरो गणिः ।

प्रकाशकः

परमकृपार्द्रचित्त-महातपस्वी धर्मार्थोद्धाराद्यनेकशासनप्रभावनाकार्यविधापकाचार्यप्रवर श्रीमज्जिनर्द्धिसूरीश्वरशिष्यरत्न श्रीमद्गुलाबमुनिवरोपदिष्ट-

गोगोलाव( राजस्थान )वास्तव्यगुरुभक्तश्रेष्ठिवर्य श्रीभेरुदानजीचोपराद्वारासम्प्राप्तज्ञानद्रव्यसाहाय्येन मुंबई पायधुनी महावीरजिनालयस्थ-

जिनदत्तसूरिज्ञानभंडारकार्यवाहको

शा० झवेरभाई केसरीचंद झवेरी

वीर संवत् २४८२ | प्रतयः ५०० । मूल्यं सार्द्धो रूप्यकः । | विक्रम संवत् २०१२

मुद्रकः—शाह गुलाबचंद लल्लुभाई
श्री महोदय प्रिन्टींग प्रेस, दाणापीठ-भावनगर.

## प्राक्कथनम्—

सुविदितचरमेतद्विदुषां, यदुत-करालेऽस्मिन् दुष्षमाकाले चरमजिनपतिश्रीमन्महावीरदेवशासनेऽतिचारो भवतु मा वा, परन्त्ववश्यमेव करणीयत्वमस्ति दैवसिकादिप्रतिक्रमणक्रियायाः श्रमणानां श्राद्धानां च, तत्र कस्याः क्रियायाः करणे को हेतुरित्यवगमार्थं गुम्फितमेतद्ग्रन्थरत्नं तपोगच्छाधिपतिभिः श्रीमज्जयचन्द्रसूरिभी रसव्योमतिथि( १५०६ )मिते वर्षे। अनेनैतेषामाचार्यवर्याणां सत्तासमयः षोडशशताब्दिप्रारम्भकालः स्फुट एव ।

संशोधनेऽस्य प्रतित्रयमासादितं, तत्राद्या प्रल्हादनपुर( डायरा )स्थभाण्डागारीया " संवत् १८४२ रा मिति माह सुदि ७ चंद्रे लिखितं । पं० क्षमाप्रभमुनिः श्रीसूरतिबिंदरे " इत्युल्लेखविराजिता पार्श्वभागेष्वनेकत्र टिप्पणटिप्पिता शुद्धप्राया चाभूत्, तस्या उपरितो लिखिता मुद्रणार्हा प्रतिर्मया । द्वितीया तु योधपुरस्थ स्व० अनुयोगाचार्य श्रीमत्केशर-मुनिजीगणिवरचित्कोषीया " संवत् १६११ वर्षे माहमासे शुक्लपक्षे अष्टम्यां तिथौ बुधवासरे लिखिता " इत्युल्लेखसमन्विता नात्यशुद्धा । तृतीया पुनर्देवचन्द्र लालभाई पु. फण्ड इत्याख्यसुप्रसिद्धसंस्थायाः कार्यवाहक केसरीचंद हीराचंद झवेरीद्वारा सम्प्राप्ता मुद्रणार्हैव प्रतिरत्यशुद्धा । एवं प्रतित्रयाधारेण सम्यक्संशोध्य परिष्कृत्य च यथास्थानं विविधटिप्पणैर्मुद्रापितोऽयं ग्रन्थो विनयविवेकाद्यनल्पगुणभूषितमुनिवरश्रीमद्गुलाबमुनिजीप्रेरणया । विहितेऽप्यायासेऽस्य शोधने छद्मस्थभावसुलभा याः स्खलना जाता भवेयुस्ताः सम्मार्जनीयाः प्रकृतिकृपालुभिर्धीधनैरित्यभ्यर्थयते विदुषां वशंवदो।

सं. २०१२ पौषकृ० ६ चन्द्रे मुंबई. बुद्धिसागरो गणिः

## अनया ग्रन्थमालया प्रसिद्धिं नीता ग्रन्थाः—

| | | |
|---|---|---|
| १ | स्नात्रपूजा ( देवचंद्रजीकृत हिन्दी ) | मू० ०–२–० |
| | ,, ,, ,, ,, ( गु० ) | ,, ०–२–० |
| ×२ | कल्याणकपरामर्श ( सं० ) | ,, ०–४–० |
| ×३ | पर्युषणादिपरामर्श ( सं० ) | ,, ०–८–० |
| ×४ | पर्युषणाकल्पसूत्र (टीका कल्पार्थबोधिनी) | ,, भेट |
| ५ | स्तवनादिसंग्रह ( देवचंद्रजीकृत ) | ,, ०–२–० |
| ६ | विधिसहित राइदेवसी प्रतिक्रमण ( गु० ) | ,, ०–८–० |
| ७ | ,, ,, पंचप्रतिक्रमण ( ,, ) | ,, १–८–० |
| ८ | आराधनादिसूत्र संग्रह (हिन्दी अनु०सह) | ,, ०–४–० |
| ९ | द्वादशपर्व कथासंग्रह ( सं० श्लोकबद्ध ) | ,, ०–८–० |
| १० | सुसढ चरित्र ( ,, ) | ,, ०–४–० |
| ११ | नवतत्त्व संवेदन प्रकरण ( सटीक ) | मू० १–०–० |
| ×१२ | स्तवनावली | |
| १३ | चातुर्मासिक व्याख्यानपद्धतिः ( संस्कृत, समयसुन्दरोपाध्याय कृता ) | ,, ०–८–० |
| *१४ | विंशतिस्थानक पूजा ( जिनहर्षसूरिकृत ) | ,, ०–२–० |
| *१५ | नवपद आराधनविधि (पाठकहीरधर्मावि०) | |
| १६ | दादा श्रीजिनकुशलसूरि ( गु० ) | ,, ०–८–० |
| १७ | युगप्रधान श्रीजिनदत्तसूरि ( गु० ) | ,, १–०–० |
| १८ | मणिधारी श्रीजिनचंद्रसूरि ( गु० ) | ,, १–०–० |
| १९ | पिंडविशुद्धि ( टीकाद्वयोपेता ) | ,, ६–०–० |
| २० | राइदेवसी प्रक्रमणसूत्र ( हिन्दी ) | ,, ०–५–० |
| २१ | प्रश्नोत्तर चत्वारिंशतक ( गु० ) | ,, ५–०–० |

× अलभ्यान्येतच्चिह्नान्वितानि पुस्तकानि । * पुस्तकद्वयस्याप्येतस्य प्राप्तिस्थानं—' दीपचंदजी गुलेच्छा, ठि० सेठ भीखराजजी अगरचंदजीकी हवेली. फलोदी ( राजस्थान ) ।

ॐ नमः श्रीमदर्हत्प्रवचनाय ।

नमोनमः परमगुरुश्रीजिनदत्त–कुशल–मोहन–यशो–ऋद्धि–केशरपादपद्मेभ्यः ।

श्रीमन्मोहन–यशःस्मारकग्रन्थमालायां

श्रीतपागच्छगगनाङ्गणदिनकरकल्पाचार्यवर्यश्रीमत्सोमसुन्दरसूरिपट्टपूर्वाचलभास्कराचार्य-
श्रीमज्जयचन्द्रसूरिविरगुम्फितो हेतुगर्भितप्रतिक्रमणविधिसंयुतः

# प्रतिक्रमणहेतुगर्भः ।

श्रीवर्द्धमानमानम्य, श्रीगुरूँश्च गुणैर्गुरून् । प्रतिक्रान्तेः क्रमः कोऽपि, यथाऽवगममुच्यते ॥ १ ॥

इह तावत्साधुना श्रावकेण च द्विसन्ध्यं विधिना प्रमार्जितादौ स्थाने, जातु तदभावे " अविहिकया वरमकयं, उस्सुअवयणं वयंति सव्वन्नू । पायच्छित्तं जम्हा, अकए गुरुअं कए लहुअं ॥ १ ॥ " इत्याद्युक्तेरप्रमार्जितादावपि पञ्चविधाचारविशुद्ध्यर्थं श्रीगुरुसमक्षं, तद्विरहे स्थापनाचार्यसमक्षं वा अहीनाधिकाक्षरमात्रं प्रतिक्रमणं विधेयं ।

इह चससाक्षिकं कृतमनुष्ठानमत्यन्तं दृढं जायते इति साक्षिणः प्रतिपादनं, पृथग्जनेऽपि प्रतीतमेतत्-ससाक्षिको व्यवहारो निश्चलो भवतीति । पञ्चाचाराश्चामी-ज्ञानाचारः १ दर्शनाचारः २ चारित्राचारः ३ तपआचारः ४ वीर्याचारः ५, उक्तं च-

पञ्चाचार-विशुद्धहेतुत्वं प्रतिक्रमणस्य ।

“ नाणम्मि दंसणम्मि य, चरणम्मि तवम्मि तह य विरियम्मि । आयरणं आयारो, इय एसो पंचहा भणिओ ॥ १ ॥ पंच विहायारविसुद्धि-हेउमिह साहू सावगो वा वि । पडिकमणं सह गुरुणा, गुरुविरहे कुणइ इक्को वि ॥ २ ॥ ”

तत्र पञ्चविधे आचारे कस्याचारस्य प्रतिक्रमणे केन सूत्रेण शुद्धिः स्यात् ? उच्यते-प्रतिक्रमणशब्द आवश्यकविशेषवाच्यपि अत्र सामान्येनावश्यके रूढः, श्रमणादिभिरवश्यं क्रियत इति, ज्ञानादिगुणा मोक्षो वा आ-समन्ताद्वश्यः क्रियतेऽनेनेति वा, आ-समन्ताद्वश्या इन्द्रियकषायादिभावशत्रवो येषां ते तथा, तैरेव क्रियते इति वाऽऽवश्यकं, तच्च षडध्ययनात्मकं, तानि चामूनि-सामायिकाध्ययनं १ चतुर्विंशतिस्तवाध्ययनं २ वन्दनकाध्ययनं ३ प्रतिक्रमणाध्ययनं ४ कायोत्सर्गाध्ययनं ५ प्रत्याख्यानाध्ययनं च ६ । उक्तं च-“ सामाइयं १ चउवीसत्थओ २ वंदणयं ३ पडिक्कमणं ४ काउस्सग्गो ५ पच्चक्खाणं ६ ” इति । एतेषां च षडर्थाधिकारा अमी यथाक्रमं-सावद्ययोगविरतिः १ जिनगुणोत्कीर्त्तनं २ ज्ञानादिगुणवतां प्रतिपत्तिः ३ ज्ञानाद्यतिचारगर्हा ४ व्रणचिकित्सान्यायेन तदपनयनं ५ गुणधारणा ६ चेति । उक्तं च—सावज्जजोगविरई, उक्कित्तण गुणवओ अ पडिवत्ती । खलियस्स निंदणा वण-तिगिच्छ गुणधारणा चेव ॥१॥

व्याख्या—प्रथमे सामायिकाध्ययने प्राणातिपातादिसर्वसावद्ययोगविरतिरर्थाधिकारः १, द्वितीये प्रधानकर्मक्षयकारण-

त्वाल्लब्धबोधिविशुद्धिहेतुत्वात्पुनर्बोधिफलत्वाच्च सर्वसावद्ययोगविरत्युपदेशकत्वेनोपकारिणां तीर्थकृतां गुणोत्कीर्तनार्थाधिकारः २, तृतीये गुणा–मूलोत्तरगुणरूपा व्रत-पिण्डविशुद्ध्यादयस्ते सन्त्यस्यासौ गुणवान्, तस्य प्रतिपत्तिर्वन्दनकादिका कार्येत्यर्थाधिकारः, च शब्दात्पुष्टालम्बनेऽगुणवतोऽपि प्रतिपत्तिः कार्येति ज्ञेयम् ३, स्खलितस्य–मूलोत्तरगुणेषु प्रमादाचीर्णस्य प्रत्यागतसंवेगस्य जन्तोर्विशुद्धाध्यवसायवशतोऽकार्यमिदमिति भावयतो निन्दा चतुर्थोऽर्थाधिकारः ४, पञ्चमे चारित्ररूपस्य भावपुरुषस्य योऽयमतिचाररूपो भावव्रणस्तस्य दशविधप्रायश्चित्तभेषजेन चिकित्साऽर्थाधिकारः ५, षष्ठे च मूलगुणोत्तरगुणप्रतिपत्तिस्तस्याश्च निरतिचारं सन्धारणमर्थाधिकारः, चशब्दादन्येऽप्यवान्तरालार्थाधिकारा विज्ञेयाः ६ ।

तत्र सामायिकेन चारित्राचारस्य शुद्धिः क्रियते १, चतुर्विंशतिस्तवेन दर्शनाचारस्य २, वन्दनकेन ज्ञानाद्याचाराणां ३, प्रतिक्रमणेन तेषामतीचारापनयनरूपा ४, प्रतिक्रमणेनाशुद्धानां तदतीचाराणां कायोत्सर्गेण ५, तपआचारस्य प्रत्याख्यानेन, वीर्याचारस्यैभिः सर्वैरपि ६ । उक्तं च—

**चारित्तस्स विसोही, कीरइ सामाइएण किल इहयं । सावज्जेयरजोगाण, वज्जणासेवणत्तणओ ॥ २ ॥**

सामायिकेन समभावलक्षणेन 'इह च' इहैव–जिनशासने, न शाक्यादिदर्शने, वर्जना चासेवनात्वं च वर्जनासेवनात्वे, आसेवनात्वमासेवनाशब्दप्रवृत्तिनिमित्तं–आसेवनमित्यर्थः, ताभ्याम् । "दंसणयारविसोही, चउवीसाइत्थएण किज्जइ य । अच्चब्भुयगुणकित्तण–रूवेणं जिणवरिंदाणं ॥ ३ ॥" जिनानां चतुर्विंशतेः स्तवेन, यद्वा चतुर्विंशतेरात्मनां–जीवानां तीर्थकरसम्बन्धिनां जिनानामत्यद्भुतलोकोद्योतकरत्वादिगुणरूपेण, आत्मपक्षे सामान्यविशेषभावेन

प्रतिक्रमण हेतुगर्भः । ॥ २ ॥

सम्बन्धः । “ नाणाईआ उ गुणा, तस्संपन्नपडिवत्तिकरणाओ । वंदणएणं विहिणा, कीरइ सोही य तेसिं तु ॥ ४ ॥ ” वन्दनकेन–ज्ञानादिसम्पन्नप्रतिपत्तिकरणात् पूर्वं चारित्रदर्शनाचारयोः शोधितयोरपि पुनर्विशेषतो वन्दनकेन शोधनाय ज्ञानादीति ग्रहणं । अत्र ‘ नाणाईआ ’ इति ज्ञाननयप्राधान्यं उत्तरत्र ‘ चरणाईआ ’ इति क्रियानयप्राधान्यं । “ खलियस्स य तेसिं पुणो, विहिणा जं निंदणाइपडिक्कमणं । तेणं पडिक्कमणेणं, तेसिं पिय कीरए सोही ॥ ५ ॥ ” स्खलितस्य–व्रतविषयस्यातिक्रमादिप्रकारजातापराधस्य, तथा ‘ तेसिं ’पि तेषां ज्ञानाचारादीनां पुनः प्रतिषिद्धकरणा-श्रद्धानविपरीतप्ररूपणादिजा[ ता ]तिचारस्य च ‘ दुष्टं मयैतत्कृत ’मिति निन्दनादि प्रतिक्रमणमुच्यते, तेन प्रतिक्रमणेन ‘ तेसिं पि य ’ [ पि ] न केवलं सामान्यतो व्रतादिविषयापराधानां, किन्तु तेषामपि ज्ञानाचारादीनां क्रियते शोधिः । “ चरणाइयाइयाणं, जहक्कमं वणचिगिच्छरूवेणं । पडिक्कमणाऽसुद्धाणं, सोही तह काउस्सग्गेणं ॥ ६ ॥ ” प्रतिक्रमणेनाशुद्धानामर्द्धशुद्धानां वा चरणादिकान्यतिगच्छन्त्यतिक्रामन्तीति चरणादिकातिगा–चारित्राद्यतिचारास्तेषां भावव्रणचिकित्सारूपेण कायोत्सर्गेण शुद्धिस्तस्य महानिर्जराकारणत्वात् । “ गुणधारणरूवेणं, पच्चक्खाणेण तवइ-आरस्स । विरियायारस्स पुणो, सव्वेहि वि कीरए सोही ॥ ७ ॥ ” एकोनत्रिंशे श्रीउत्तराध्ययनेऽप्याह–“ सामाइएणं भंते ! जीवे किं जणयइ ?, सामाइएणं सावज्जजोगविरइं जणयइ ” इत्यादि ।

कायोत्सर्गेण दैवसिकप्रतिक्रमणकालस्वरूपमेवं–“ अद्धनिवुड्डे सूरे, सुत्तं कड्ढंति गीयत्था । इय वयणपमाणेणं, देवसियावस्सए कालो ॥ १ ॥ ” रात्रिकस्य त्वेवं–“ आवस्सयस्स समए, निद्दामुक्कं करिंति आयरिया ।

दर्शनाचार-विशुद्धिहेतुत्वं चतु-र्विंशतिस्त-वस्य ।

॥ २ ॥

तह तं कुणंति जइ, दसपडिलेहणाणंतरं सूरो ॥ २ ॥" अपवादतस्तु दैवसिकं दिवसतृतीयप्रहरादन्वर्द्धरात्रं यावत्, रात्रिकं तु [ रात्रितृतीयप्रहरादस्तु ] दिवसप्रहरं यावत्, योगशास्त्रवृत्तौ तु दैवसिकं मध्याह्नादन्वर्द्धरात्रं यावत्, रात्रिकमर्द्धरात्रात्प्रभृति मध्याह्नं यावदित्युक्तम् । उक्तं च–" + उग्घाडापोरिसिं जा, राइयमावस्सयस्स चुण्णीए । ववहाराभिप्पाया, भणंति पुण जाव पुरिमड्ढं ॥ १ ॥"

तत्र च काले आवश्यकारम्भे साधुः श्रावकश्चादौ श्रीदेवगुरुवन्दनं विधत्ते, सर्वमप्यनुष्ठानं श्रीदेवगुरुवन्दनविनयबहुमानादिभक्तिपूर्वकं सफलं भवतीति, आह च–" विणयाहीया विज्जा, दिंति फलं इह परे य लोगम्मि । न फलंति विणयहीणा, सस्साणि व तोयहीणाणि ॥ १ ॥ भत्तीइ जिणवराणं, खिज्जंति पुव्वसंचिया कम्मा । आयरियनमुक्कारेणं, विज्जा मंता य सिज्झंति ॥ २ ॥ इति हेतोर्द्वादशभिरधिकारैश्चैत्यवन्दनाभाष्ये–" पढमहिगारे वंदे, भावजिणे १ बीयए उ दव्वजिणे २ । इगचेइअठवणजिणे, तइय ३ चउत्थम्मि नामजिणे ४ ॥ १ ॥ तिहुअणठवणजिणे पुण, पंचमए ५ विहरमाणजिण छट्ठे ६ । सत्तमए सुयनाणं ७, अट्ठमए सव्वसिद्धथुई ८ ॥ २ ॥ तित्थाहिववीरथुई ९, नवमे दसमे य उज्जयंतथुई १० । अट्ठावयाइ इगदसि ११, सुदिट्ठिसुरसमरणा

---

+ न चात्र 'बहुपडिपुण्णा पोरिसी' ति भणनं युक्तियुक्तं, सर्वमान्यप्राचीनाचार्यरचितशास्त्रेषु प्रायः सर्वेष्वपि 'उग्घाडापोरिसी' ति भणनस्यैवोक्तत्वात् 'बहुपडिपुण्णे' ति शब्दस्यापि सर्वांशेन पूर्णार्थत्वाच्च, यदुक्तं श्रीशान्तिचन्द्रोपाध्यायरचितायां जम्बूद्वीपप्रज्ञप्तिटीकायां " बहुप्रतिपूर्ण–देशेनापि न न्यूनमिति ।" [ पत्र १५८ ]

चरिमे १२ ॥ ३ ॥ नमु० १ जे[अ] अइ० २ अरिहं० ३, लोग० ४ सव्व० ५ पुक्ख० ६ तम० ७ सिद्धा० ८ । जो देवा० ९ उज्जिं० १० चत्ता० ११, वेयावच्चग० १२ अहिगारपढमपया ॥ ४ ॥ " इति गाथोक्तैर्देवान्वन्दते ।

तत्र चाथं मुद्राविधिः–श्रीअभयदेवसूरिकृतदेववन्दनपञ्चाशकवृत्तिमतः–प्रणिपातदण्डकपाठस्यादावसाने च प्रणामः पञ्चाङ्गमुद्रया क्रियते, पञ्चाङ्गान्यवयवाः करजानुद्वयोत्तमाङ्गलक्षणानि क्षितिस्थव्यापारवन्ति यस्यां सा तथा, पञ्चाङ्ग्या अपि मुद्रात्वमङ्गविन्यासविशेषरूपत्वाद्योगमुद्रावत्, शक्रस्तवादिस्तवपाठस्तु " अन्नुन्नंतरि अंगुलि, कोसागारेहिं दोहिं हत्थेहिं । पिट्टोवरि कुप्परसं–ठिएहिं तह जोगमुद्दत्ति ॥ १ ॥ " इति लक्षणया योगमुद्रया ।

ननु चतुर्विंशतिस्तवादेरेव पाठो योगमुद्रया विधेयो न तु शक्रस्तवस्य, तं हि " समाकुञ्चितवामजानुर्भूविन्यस्तदक्षिणजानुर्ललाटपट्टघटितकरकुड्मलः पठती " ति जीवाभिगमादिष्वभिधीयते, सत्यं, केवलं नानन्तरोक्तविशेषणयुक्त एव तं पठतीति नियमोऽस्ति, " पर्यङ्कासनस्थः शिरोविनिवेशितकरकोरकस्तं पठती "त्यस्यापि ज्ञाताधर्मकथासु दर्शनात् । तथा हरिभद्राचार्येणापि चैत्यवन्दनवृत्तौ " क्षितिनिहितजानुकरतलो भुवनगुरौ विनिवेशितनयनमानसः प्रणिपातदण्डकं पठती "त्युक्तेः । ततोऽस्य पाठे विविधविधिदर्शनात्सर्वेषां च तेषां प्रमाणग्रन्थोक्तत्वेन विनयविशेषभूतत्वेन च विशेषमुक्तस्वयत्नाद्योगमुद्रयाऽपि शक्रस्तवपाठो न विरुध्यते, विचित्रत्वाज्जिनमतानां, न चैतानि परस्परमतिविरुद्धानि, सर्वैरपि विनयस्य दर्शितत्वात् ।

तथा " अरिहंतचेइयाणं " इत्यादिदण्डकपाठेन जिनबिम्बादिस्तवनं " चत्तारि अंगुलाइं, पुरओ ऊणाइं ॥ ३ ॥

जत्थ पच्छिमओ । पायाणं उस्सग्गो, एसा पुण होइ जिणमुद्दा ॥ १ ॥" इति लक्षणया जिनमुद्रया । इयं च पादाश्रिता योगमुद्रा च हस्ताश्रितेत्युभयोरप्यत्र प्रयोगः, पञ्चाङ्गमुद्रामुक्ताशुक्तिमुद्रयोस्तु प्रतिक्रमणेनाधिकारः ।

देवान्वन्दित्वा च चतुरादिक्षमाश्रमणैः श्रीगुरून्वन्दते, लोकेऽपि हि राज्ञः प्रधानादीनां च बहुमानादिना स्वसमीहित-कार्यसिद्धिर्भवति, अत्र राजस्थानीयाः श्रीतीर्थकराः प्रधानादिस्थानीयाः श्रीआचार्यादय + इति । श्रावकस्तु तदनु 'इच्छकारि समस्तश्रावको वांदुं *' इति भणति ।

एवं च चारित्राचारादिशुद्धिं चिचिंतुस्तत्सिद्धिमभिलषमाणश्चारित्राचाराद्याराधकान् सम्यक् प्रणिपत्याऽतीचार-भारभारित इवावनतकाययष्टिर्भूनिहितशिराः सकलातिचारबीजकं "सव्वस्स वि देवसिय" इत्यादिसूत्रं भणित्वा मिथ्यादुष्कृतं दत्ते । इदं च सकलप्रतिक्रमणबीजकभूतं ज्ञेयं, अन्यत्रापि च ग्रन्थादौ आदौ बीजकस्य दर्शनात् । "जय जंतु-कप्पपायव" इत्यादाविव । अनेन च प्रतिक्रमणस्यादौ बीजकोपन्यासेन श्रीभागवतदर्शने सर्वस्याप्यर्थस्य अविशेष-[तो]या सामान्यविशेषरूपताऽभ्युपगम्यते, सा प्रतिक्रमणेऽप्यनूद्यते इति सम्भाव्यते । आह च–"वंदित्तु चेइयाइं, दाउं चउराइए खमासमणे । भूनिहियसिरो सयला-इयारमिच्छुक्कडं देइ ॥ १ ॥" तत उत्थाय ज्ञानादिषु चारित्रं गरिष्ठं, तस्य मुक्तेरनन्तरकारणत्वात्, ज्ञानादेस्तु परम्परकारणत्वात् । तथाहि–सर्वात्मना चारित्रं हि शैलेश्य-

---

+ नवरं 'भगवानहं' मिति भणनस्य सूचनमप्यकारि ग्रन्थकारेणातो विरुद्धं स्वपूर्वजोक्तेरद्यतनानां 'भगवानहं' मिति जल्पनम् ।

* एवं जल्पनस्येदंयतना एतदपि स्वपूर्वजाद्यनुक्तमेव ।

वस्थायामेव, तदनन्तरं चावश्यं मुक्तिः। ज्ञानं तु सर्वात्मना क्षीणमोहानन्तरमेव, न च तदनन्तरमवश्यं मुक्तिः, जघन्यतोऽप्यन्तराले प्रत्येकमान्तर्मौहूर्त्तिकसयोग्ययोगिगुणस्थानकद्वयभावात्, तथा "जम्हा दंसणनाणा, संपुण्णफलं न दिंति पत्तेयं। चारित्तजुया दिंति अ, विसिस्सए तेण चारित्तं ॥ १ ॥" तथा "सम्मत्तं अचरित्तस्स, हुज्ज भयणाइ नियमसो नत्थि। जो पुण चरित्तजुत्तो, तस्स उ नियमेण सम्मत्तं ॥ २ ॥" तथा "गोत्रशुद्धो नरो नैव, सद्गुणोऽपि प्रणम्यते। अलङ्कृतनृपश्रीस्तु, वन्द्यते नतमौलिभिः ॥ १ ॥ एवं न केवलज्ञानी, गृहस्थो नम्यते जनैः। गृहीतभावचारित्रः, शक्रैरपि स पूज्यते ॥ २ ॥ अतो दिशन्ति चारित्रं, केवलज्ञानतोऽधिकम्। तस्मिँल्लब्धेऽपि तल्लब्धं, तेन धावन्ति धीधनाः ॥ ३ ॥" इति हेतोरादौ चारित्राचारविशुद्ध्यर्थं "करेमि भंते! सामाइय"मित्यादिसूत्रत्रयं पठित्वा द्रव्यतो वपुषा भावतश्च शुद्धपरिणामेनोच्छ्रितोच्छ्रितमेकोनविंशतिकायोत्सर्गदोषरहितं कायोत्सर्गं कुर्यात्। कायोत्सर्गश्च नवधा उच्छ्रितोच्छ्रित इत्यादि, आह च—

"उसिउस्सिअ १ तह उस्सिओ, य २ उस्सियनिसन्नओ ३ चेव। निसन्नुस्सिओ ४ निसन्नो ५, निसन्नगनिसन्नओ ६ चेव ॥ १ ॥ निवन्नुसिअ ७ निवन्नो ८, निवण्णगनिवण्णओ ९ य नायव्वो।"

व्याख्या—धर्मशुक्ले यत्र ध्यायति स उच्छ्रितोच्छ्रितः १, धर्मादि चत्वारि ध्यानानि ध्यायति यत्र स द्रव्योच्छ्रितः २, आर्त्तरौद्रे यत्र ध्यायति स द्रव्योच्छ्रितो भावतो निषण्णः ३, एषु ऊर्ध्वस्थित इति ज्ञेयम्। धर्मशुक्ले ध्यायति यत्र एष निषण्णोच्छ्रितः ४, धर्मादि चत्वारि ध्यानानि यत्र न ध्यायति स निषण्णः ५, आर्त्तरौद्रे ध्यायति यत्र स निषण्णनिषण्णः ६,

एषु निषण्ण इति ज्ञेयम् । धर्मशुक्ले ध्यायति एष निषण्णोच्छ्रितः ७, धर्मादि चत्वारि ध्यानानि यत्र न ध्यायति स निषन्नः ८, आर्त्तरौद्रे ध्यायति यत्र स निषन्ननिषन्नः ९, एषु त्रिष्वपि निषन्नः ( अनिद्रसुप्तः ) सन्निति विशेषणं ज्ञेयं, उक्तं च—

" सामाइय पुव्वमिच्छामि ठाउं काउस्सग्गमिच्चाई । सुत्तं भणिय पलंबिय-भुअकुप्परधरियपहि-रणओ ॥ १ ॥ संजइ १ कविट्ठ २ थण ३ लय ४-लंबुत्तर ५ खलिण ६ सबरि ७ वहू ८ पेहो ९ । वारुणि १० भमुहं ११ गुलि १२ सीस १३ मूअ १४ हय १५ काय १६ नियलु १७ द्धी १८ ॥ २ ॥ थंभाइ १९ दोसरहियं, कुणइ दुहुस्सिओ तणुस्सग्गं । नाभि अहो जाणुड्ढं, चउरंगुलठवियकडिपट्टो ॥ ३ ॥

व्याख्या-संयतीवत्कोमयस्कन्धोपरि प्रावृणुयात्, यदि प्रावृणुयात्तदोत्तरासङ्गेन १, चक्कडादिभयात् कपित्थवत्परिधानं पिण्डयेत् २, दंशादिरक्षणार्थमज्ञानाद्वा न हृदयं प्रच्छादयं ३, वाताहतलतावन्न कम्पेत ४, नाभेरुपरि जानोरधश्च प्रालम्बनं वस्त्रं न विदध्यात् ५, कविकवत्पाग्रे रजोहरणादि धार्यम् ६, नग्नसनशबरीवत्पाग्रे करौ कार्यौ ७, वधूवत्सात्यन्तं नाम्यं शिरः, किन्तु नाशाग्रादौ दृशौ स्थाप्ये यथा वा पादाङ्गुष्ठयोरग्रं दृश्यते ८, अनुप्रेक्षमाणो वानरवदोष्ठपुटौ न चालयेत् ९, सुरावन्न बुडबुडयेत् १०, इतस्ततो न भ्रुवौ चालयेत् ११, आलापकसङ्ख्यार्थं नाङ्गुलीश्चालयेत् १२, यक्षाविष्टवन्न शिरःकम्पं कुर्यात् १३, मूकवन्न छेदकादौ हुंहुं कुर्यात् १४, अश्ववत्पादमेकमाकुंच्य न विषमपादः कायोत्सर्गे तिष्ठेत् १५, काकवच्चक्षुर्गोलकं वामेतरदिशासु न क्षिपेत् १६, निगडितवत्पादौ न विस्तार्यौ न मीलनीयौ १७, शकटोद्धिवदंगुष्ठौ पार्ष्णी वा न मीलयेत् १८, स्तम्भे कुड्यादौ वा नावष्टम्भीयात् १९ ।

कायोत्सर्गे च प्रातस्त्यप्रतिलेखनायाः प्रभृतिदिवसातिचारांश्चिन्तयति मनसा सम्प्रधारयेच्च " सयणासणे "त्यादिगाथाचिन्तनतः । एतदतीचारचिन्तनं मनसा सङ्कलनं च श्रीगुरुसमक्षमालोचनार्थं, अन्यथा तत्सम्यक् न स्यात्, लोकेपि हि राजादीनां किमपि विज्ञप्यं मनसा सम्प्रधार्य कागदादौ लिखित्वा वा विज्ञप्यते । ततश्च नमस्कारपूर्वं कायोत्सर्गं पारयित्वा चतुर्विंशतेस्तवं पठेत् । आह च—

" काउस्सग्गम्मि ठिओ, निरेअकाओ निरुद्धवयपसरो । जाणइ सुहुमेगमणो, मुणि देवसिआइ अइआरं ॥ १ ॥ परिजाणिऊण य तओ, सम्मं गुरुजणपगासणेणं तु । सोहेइ अप्पगं सो, जम्हा य जिणेहिं सो भणिओ ॥ २ ॥ काउस्सग्गं मुक्खपह-देसिअं जाणिऊण तो धीरा । दिवसाइआर जाणण-ट्ठाए ठायंति उस्सग्गो ॥ ३ ॥ सयणासणन्नपाणे, चेइअजइसिज्जकायउच्चारे । समिइभावणागुत्ती, वितहायरणे[य] अइआरो ॥ ४ ॥ गोसे मुहणंतगाई, आलोए देसिए अईयारे । सव्वे समाणइत्ता, हियए दोसे ठविज्जाहि ॥ ५ ॥ काउं हियए दोसे, जहक्कमं जा न ताव पारिंति । ताव सुहुमाणपाणू, धम्मं सुक्कं च झाइज्जा ॥ ६ ॥ " तथा " तत्थ य धरेइ हियए, जहक्कमं दिणकए अईयारे । पारित्तु नमुक्कारेण, पढइ चउवीसत्थयं दंडं ॥ १ ॥ "

व्याख्या—' निरेअकायो ' निष्प्रकम्पकायः सुखं-सुखेन मुनिर्दैवसिकाद्यतीचारं [जानाति], यस्माच्च जिनैः कायोत्सर्गो भणितस्तस्मात्कायोत्सर्गः कार्यः । यतश्चैवमतः ' काउ० ' मोक्षपथ उपचारात्तीर्थकृता देशितस्तं दिवसातिचारज्ञानार्थमित्युपलक्षणं राज्यतिचारज्ञानार्थं च । तत्रौघतो विषयद्वारेण तमतिचारमाह-" सयणा० " ' शयनं ' शयनीयं संस्तारकादि

'आसनं' पीठ(फल)कादि, अन्नपाने प्रतीते, तेषामविधिना ग्रहणादौ वितथाचरणोऽतिचारः। चैत्यविषयं च वितथाचरणम-विधिना वन्दनकरणेऽकरणे चेत्यादि, यतिविषयं वितथाचरणं च यथाऽर्हं विनयाद्यकरणं, शय्या-वसतिस्तद्विषयमविधिना प्रमार्जनादौ स्त्र्यादिसंसक्तायां वा वसत इत्यादि, काय इति कायिका 'उच्चारः' पुरीषं, तद्विषयमस्थण्डिले व्युत्सृजत इत्यादि, समितयः पञ्च, भावना-अनित्याद्या द्वादश पञ्चविंशतिर्वा, गुणस्थितः, वितथाचरणं चाऽऽसामविधिना सेवनेन विधिनाऽ-सेवनेन चेत्यादि, तस्मिन् सत्यतीचारः। इत्थमतिचारमुक्त्वा कायोत्सर्गगतस्य मुनेः क्रियामाह-'गोस॰' गोसात्-प्रत्युषा-दारभ्य 'मुखानन्तकादौ, मुखवस्त्रिकादौ विषये अवलोकयेत् दैवसिकानतीचारानविधिप्रत्युपेक्षितादीन्, ततः सर्वानतिचारान् मुखवस्त्रिकाप्रत्युपेक्षणादारभ्य यावत्कायोत्सर्गेणावस्थानं। अत्रान्तरे 'समाणइत्ता' समाप्य सूक्ष्माऽवलोकनेनैतावन्त एते, नातः परमतिचारोऽस्तीति, ततो हृदये दोषानालोचनीयान् स्थापयेत्। 'काउं॰' दोषान् यथाक्रमं-प्रतिसेवनानुलोम्येना-लोचनानुलोम्येन च, प्रतिसेवनानुलोम्यं-ये यथा सेविताः, आलोचनानुलोम्यं तु-पूर्वं लघव आलोच्यन्ते पश्चाद्गुरवः। यावच्च संस्पारयति गुरुस्तावत् सूक्ष्मप्राणापानः-सूक्ष्मोच्छ्वासनिःश्वासो धर्मं शुक्लं च ध्यायेत्। "तत्थ य धरेइ" इति गाथा न पूर्वगाथासम्बद्धा, किन्त्वन्यग्रन्थेति न पौनरुक्त्यम्।

कायोत्सर्गे गुरोरयं विशेषः-" × जा देवसियं दुगुणं, चिंतेइ गुरू अहिंडओ चिट्ठं। बहुवावारा इयरे, एगगुणं ताव चिंतंति ॥ १ ॥ पच्चइआण व चिट्ठं, नाऊण य गुरूं बहुं बहुविहायं। कालेण तदुचिएणं,

× 'सयणासणे' त्यादिगाथार्थं द्विर्गुरुः परिभावयेत्; श्रावकस्तु "नाणम्मि दंसणम्मि" इत्यादि गाथाऽष्टकार्थं चिन्तयेत्।

पारेइ थेव चिट्ठो वि ॥ २ ॥" चतुर्विंशतिस्तवपाठादनु आनुपाश्चात्यभागपिण्डिकादिप्रमृज्योपविश्य च श्रीगुरूणां वन्दनकदानार्थं मुखवस्त्रिकां कायं च द्वावपि प्रत्येकं पञ्चविंशतिधा प्रतिलिखेत् । उक्तं च–" संडासए पमज्जिय, उवविसिअ अलग्गविअयबाहुजुओ । मुहणंतयं च कायं, च पेहए पंचवीसइहा ॥ १ ॥" इयं च देहप्रतिलेखना पञ्चविंशतिः पुरुषानाश्रित्य विज्ञेया, स्त्रीणां तु गोप्यावयवविलोकनरक्षणाय हस्तद्वयवदनपादद्वयानां च प्रत्येकं तिस्रः प्रमार्जना इति पञ्चदशैव भवन्तीति प्रवचनसारोद्धारवृत्तौ ।

तथा मुखवस्त्रिकाकायप्रतिलेखनायां मनसः स्थिरीकरणार्थमेवं चिन्तयेत्–" सुत्तत्थतत्तदिट्ठी १, दंसणमोहतिगं च ४ रागतिगं ७ । देवाइतत्ततिगं १०, तह य अदेवाइअत्ततिगं १३ ॥ १ ॥ नाणाइतिगं १६ तह तव्विराहणा १९ तिन्नि गुत्ति २२ दंडतिगं २५ । इय मुहणंतगपडिले–हणाइ कमसो विचिंतिज्जा ॥ २ ॥ हासो रई य अरई ३, भयसोगदुगुंछया य ६ वज्जिज्जा । भुअजुयलं पेहंतो, सीसे अपसत्थलेसतिगं ९ ॥ ३ ॥ गारवतिगं १२ च वयणे, उरि सल्लतिगं १५ कसाय चउ पिट्ठे १९, पयजुगि छज्जीववहं २५, तणुपेहाए वि झाणमिणं ॥ ४ ॥ जइ वि पडिलेहणाए, हेऊ जिअरक्खणं जिणाणा य । तह वि इमं मणमक्कड–निज्जंतणत्थं मुणी बिंति ॥ ५ ॥" इति ।

तदनु वन्दनके दद्यात्, एतद्वन्दनं च कायोत्सर्गविचारितातीचारालोचनार्थं । वन्दनं च द्वात्रिंशद्दोषरहितं पञ्चविंशत्यावश्यकविशुद्धं च विधेयं । उक्तं च–" उद्धट्ठिओ सविणयं, विहिणा गुरुणो करेइ किइकम्मं । बत्तीसदोस-

॥ ६ ॥

रहियं पणवीसावस्सयविसुद्धं ॥ १ ॥ थद्ध १ पविद्ध २ मणाढिय ३–परिपिंडिअ ४ मंकुसं ५ झसुव्वत्तं ६ । कच्छवरिंगिय ७ टोलगई ८, ढड्ढरं ९ वेइयाबद्धं १० ॥ २ ॥ मणदुट्ठ ११ रुट्ठ १२ तज्जिय १३–सढ १४ हीलिय १५ तेणियं १६ च पडिणीयं १७ । दिट्ठमदिट्ठं १८ सिंगं १९, कर २० मोअण २१ मूण २२ मूयं च २३ ॥ ३ ॥ भय २४ मित्ती २५ गारव २६–कारणेहिं २७ पलिउंचियं २८ भयंतं २९ च । आलिद्धमणालिद्धं ३०, चूलिय ३१ चुडुलित्ति ३२ बत्तीसा ॥ ४ ॥"

व्याख्या—'स्तब्धं' मदाज्जात्यादिस्तब्धो वन्दते १, पविद्धं–वन्दनं दत्त्वैव नश्यति २, अनादृतं–अनादरं सम्भ्रमरहितं वन्दते ३, परिपिण्डितं–प्रभूतानेकवन्दनेन वन्दते, आवर्त्तान् व्यञ्जनाभिलापान् वा व्यवच्छिन्नानकुर्वन् ४, अङ्कुशं–अङ्कुशवद्रजोहरणं करद्वयेन गृहीत्वा वन्दते अथवा चोलपट्टादावुपकरणे हस्ते वा गुरुं धृत्वोपवेश्य वन्दनं ददाति ५, झषोद्वृत्तं–एकं वन्दित्वा द्वितीयं मत्स्यवदुत्तरेचकावर्त्तेन द्वितीयपार्श्वेन परावर्तमानो वन्दते ६, कच्छपवद्रिङ्गन्वन्दते ७, तिड्डवदुत्प्लुत्योत्प्लुत्य विसंस्थुलं वन्दते ८, महता शब्देनोच्चारयन्वन्दते ९, जानुनोरुपरि हस्तौ निवेश्याधो वा पार्श्वयोर्वा उत्सङ्गे वा एकं वा जानुं करद्वयान्तः कृत्वा वन्दते १०, वन्द्यो हीनः केनचिद्गुणेन तमेव मनसि कृत्वा सासूयो वन्दते ११, क्रोधाध्मातो वन्दते १२, न कुप्यसि न प्रसीदसि काष्ठशिव इवेत्यादि तर्जयन्नङ्गुल्यादिभिर्वा तर्जयन् वन्दते १३, शाठ्येन विश्रम्भार्थं वन्दते ग्लानादिव्यपदेशं वा कृत्वा न सम्यग् वन्दते १४, किं भवता वन्दितेनेत्यादि हीलयित्वा वन्दते १५, मा मे लाघवं भवत्विति परेभ्य आत्मानं गूहयन् स्तेन इव वन्दते १६, आहारादिकाले वन्दते १७, (अन्येनान्तरितः) तमसि

२

व्यवहितो वा (मौनं विधायास्ते, न तु वन्दते, दृश्यमानस्तु) वन्दते १८, उत्तमाङ्गैकदेशेन वन्दते १९, करं मन्यमानो वन्दते, न निर्जरार्थं २०, नान्यथा मोक्ष इति वन्दते २१, व्यञ्जनाभिलापावश्यकैरसम्पूर्णं २२ आलापकाननुच्चारयन् वन्दते २३, मा गच्छादिभ्यो निर्द्धाटयन्त्विति भयेन वन्दते २४, मैत्रीनिमित्तं २५, गौरवनिमित्तं–विदन्तु मां सामाचारीकुशलोऽयमिति २६, ज्ञानादिव्यतिरिक्तं कारणमाश्रित्य वन्दते, वस्त्रादि मे दास्यतीत्यादि २७, अदृष्टवन्दित एव देशादिकथां करोति २८, भजन्तं वन्दते, भजति भजिष्यतीति वा बुद्ध्या २९, आश्लिष्टानाश्लिष्टं, अत्र चतुर्भङ्गी–रजोहरणं कराभ्यां श्लिष्यति शिरश्च, एष शुद्धः १, रजोहरणं न शिरः २, शिरो न रजोहरणं ३, उभयमपि न ४, शेषत्रिषु दोषः ३०, वन्दित्वा पश्चाद्गाढं 'मस्तकेन वन्दे' इति वक्ति ३१, उल्मुकमिवान्तेन गृहीत्वा रजोहरणं भ्रमयन् वन्दते ३२ ।

पञ्चविंशतिरावश्यकानि चैतानि–" दुपवेसं २ अहाजायं ३, दुओणयं ५ पयडबारसावत्तं १७ । इगनिक्खमणं १८ तिगुत्तं २१, चउसिरनमणं २५ ति पणवीसा ॥ १ ॥ " एवं विधिना वन्दनं प्रदाय सम्यगवताङ्गः पूर्वं कायोत्सर्गे स्वमनोऽवधारितान् दैवसिकातीचारान् " इच्छाकारेण संदिसह भगवन् देवसियं आलोएमि ? " इत्यादि सूत्रं चारित्रविशुद्धिहेतुकमुच्चारयन् श्रीगुरुसमक्षमालोचयेत् । आह च–" अह सम्ममवणयंगो, करजुयविहियधरियपुत्तिरयहरणो । परिचिंतिए ऽइयारे, जहक्कमं गुरुपुरो वियडे ॥ १ ॥ " एवं दैवसिकातीचारालोचनानन्तरं मनोवचनकायसकलातीचारसङ्ग्राहकं " सव्वस्स वि देवसिय० " इत्यादि पठेत् । ' इच्छाकारेण संदिसह भगवन् ! " इत्यनेनानन्तरालोचितातीचारप्रायश्चित्तं च मार्गयेत् । गुरवश्च " पडिक्कमह " इति प्रतिक्रमणरूपं प्रायश्चित्तमुपदिशन्ति, तत्र दक्ष-

विधे प्रायश्चित्ते द्वितीयप्रायश्चित्तरूपं, प्रथमप्रायश्चित्तं त्वालोचनारूपं प्रा(? प्र)कृतम् । दशविधं चैवं—

आलोअण १ पडिक्कमणे २, मीस ३ विवेगे ४ तहा विउस्सग्गे ५ ।
तव ६ च्छेय ७ मूल ८ अणवट्ठया य ९ पारंचिए १० चेव ॥ १ ॥

व्याख्या–तत्र 'आ' इति मर्यादया 'लोचनं' गुरुसमक्षं प्रकटीकरणमालोचनं, तच्च गमनागमनादिष्ववश्यकार्येषु सम्यगुपयुक्तस्य निरतिचारस्य, सातिचारस्य तूपरितनप्रायश्चित्तसम्भवात्तथा छद्मस्थस्य, न तु केवलज्ञानिनः, [ तस्य ] कृतकृत्यत्वेनालोचनाया अभावात् । अयमर्थः–सर्वस्मिन्नपि क्षेत्रप्रतिलेखन-स्थण्डिलान्वेषण-शैक्षनिष्क्रमण-संलेखनादिकरणीयव्यापारे हस्तशताद्बहिराचरिते गुरोरनालोचितेऽशुद्धः समित्याद्यतिचारलेशवान् , आलोचयंस्तु शुद्धः, हस्तशतमध्याचरितं तु किञ्चित्प्रश्रवणादिकमालोच्यते किञ्चिच्च खेल-सिङ्घान-जल्ल-निविशनो-त्थान-विजृम्भणा-कुञ्चन-प्रसारणो-च्छ्वास-निःश्वासादिकं नालोच्यते । नन्वेवंविधस्यान्यथापि शुद्धिरेव, यथासूत्रं प्रवृत्तेः, सत्यं, चाञ्चेष्टानिमित्ताः सूक्ष्माश्रवक्रियाः समित्याद्यतिचारलेशरूपास्तासां शुद्ध्यर्थमालोचना ।

ननु करणीयेषु यथोक्तविधिकृत्येष्वपि यद्यालोचनाप्रायश्चित्तं तर्हि न किमपि कर्त्तव्यं, व्रतमादाय प्रथममेवानशनं कार्यं, तच्च, एवं सति तीर्थोच्छेदः, कः केन विशोधयिष्यते ? । किञ्च–न खलु मालिन्याशङ्कया वस्त्राणि न परिधीयन्ते, अपरिधाने हि विवस्त्रतया सर्वेषां पशुत्वापत्तिस्ततः परिधीयन्त एव, जातमालिन्यानि च जलेन प्रक्षाल्य निर्मलीक्रियन्ते, एवं चारित्रमपि करणीययोगकरणे सञ्जातातिचारलेशमलमालोचनाप्रायश्चित्तजलेन विशोध्य निर्मलीकार्यं १ । [ ईर्यायां कथां कथयेत् गृहस्थ-

प्रतिक्रमण हेतुगर्भः ।

॥ ८ ॥

भाषया ढड्डरस्वरेण वा वदेत् २, एषणायामनुपयुक्तः ३ भाण्डोपकरणस्यादाने निक्षेपे वाऽप्रमार्जयिता ४, अप्रत्युपेक्षिते स्थण्डिले उच्चारादीनां परिष्ठापयिता, न तु हिंसादोषमाप ५, मनसा दुश्चिन्तितं ६, वचसा दुर्भाषितं ७, कायेन दुश्चेष्टितं कृतं स्यात् ८, कन्दर्पो हासो वा इत्यादि ९ कषाः क्रोधादयः विषयेष्वभिष्वङ्गश्च सहसाऽनाभोगतो वा कृतः स्यात्, आचार्यादौ मनसा द्वेषादौ चान्तरभाषादिकृतौ, तथापरो गमनादौ " इच्छामिच्छातहकारा "दकरणे मिथ्यादुष्कृतं* ] ईर्यासमित्यादौ सहसात्कारतोऽनाभोगतो वा पथि कथादिकथन-गृहस्थभाषाभाषणादिप्रमादेन मिथ्याकरणे मिथ्यादुष्कृतरूपं प्रतिक्रमणं, एतच्च मिथ्यादुष्कृतेनैव शुध्यति, नहि गुरुणामालोच्यते २ । शब्दादीन्द्रियार्थाननुभूय कस्यापि संशयः स्यात्-यच्छब्दादिषु रागद्वेषौ गतोऽहं न वेति, ततो यच्छङ्काविषये आलोचनापूर्वं मिथ्यादुष्कृतेन शुध्यति तन्मिश्रं, रागद्वेषौ गतोऽहमिति निश्चिते तु तपः प्रायश्चित्तम् ३ । अनेषणीयेऽशनादिके शुद्धबुद्ध्या गृहीते पश्चादशुद्धे ज्ञाते प्रथमपौरुष्यामानीतं चतुर्थपौरुषीं यावद्धृतं तथा अर्द्धयोजनातिक्रमेण नीतमानीतं वा तस्मिन् कालक्षेत्रातीते उद्गतानस्तमितबुद्ध्याऽनुद्गतेऽस्तमिते वा सूर्ये भक्तादौ गृहीते च त्यागेनैव शुद्धिस्तद्विवेकः ४ । यत्कायचेष्टानिरोधोपयोगमात्रेण दुःस्वप्नजनितादि शुध्यति तद्व्युत्सर्गः ५ । यत्र सचित्तपृथिव्यादिसङ्घट्टादौ निर्विकृतिकादिषण्मासान्तं तपो दीयते तत्तपः ६ । यस्मिन् व्रतारोपणकालादारभ्याहोरात्रपक्षकादिना क्रमेण सन्दूषितपूर्वपर्यायच्छेदः शेषपर्यायरक्षानिमित्तं क्रियते, दुष्टव्याधिदूषितदेहैकदेशच्छेद इव शेषावयवरक्षार्थं, तच्छेदः, इदं च तपोदुर्दमो यः षण्मासक्षपकोऽन्यो वा विकृष्टतपःकरणक्षमस्तपसा गर्वितः स्याद्यथा ' किं ममा-

प्रायश्चित्तस्य दशविधत्वम् ।

॥ ८ ॥

* प्रत्यन्तरपुस्तकप्रतावेवास्यैतच्चिह्नान्तर्गतः पाठः ।

नेन प्रभूतेनापि तपसा क्रियते ? ' इति, तपोऽसमर्थो वा ग्लानासहबालवृद्धादिस्तथाविधतपःश्रद्धानरहितो निष्कारणमपवादरुचिर्वा, तस्य ज्ञेयम् ७ । आकुट्या पञ्चेन्द्रियवधे, दर्पेण मैथुने, मृषावादादत्तादानपरिग्रहेषु उत्कृष्टेषु सेवितेषु, आकुट्या पुनः पुनः सेवितेषु वा मूलं, स्वल्पेऽपि अनवस्थाप्यं कार्येषु ८ । यष्टिमुष्ट्यादिभिर्मरणनिरपेक्षतया स्वस्य परस्य वा घोरपरिणामतः प्रहरणं, तेनातिसङ्क्लिष्टमना न व्रतेषु स्थाप्यते यावदुचितं तपो न कृतं स्यात्, उचितं चोत्थाननिषिदनाद्यशक्तिपर्यन्तं, स हि यदोत्थानाद्यपि कर्तुमशक्तस्तदाऽन्यान् प्रार्थयते-' आर्या ! उत्थातुमिच्छामी 'त्यादि, ते तु तेन सहामुवन्त-स्तत्कारयन्ति, एतावति तपसि कृते तस्योत्थापना क्रियते ९ । स्वलिङ्गिनी-नृपभार्यादिसेवा-लिङ्गिघात-राजवधादिभिरव्यक्तलिङ्गभृतां जिनकल्पिकामानां क्षेत्राद्बहिःस्थानां सुविपुलं तपस्तपस्यतां महासत्त्वानां सूरीणामेव जघन्यतः षण्मासानुत्कृष्टतो द्वादशवर्षाणि पाराञ्चिकं, ततोऽतिचारपारगमनानन्तरं प्रव्राज्यते, नान्यथा १० ।

तत्रोपाध्यायस्य येषु येष्वपराधेषु पाराञ्चिकं तेष्वपि बहुशः सेवितेष्वनवस्थाप्यमेव, उपाध्यायस्यानवस्थाप्यान्तस्यैव प्रायश्चित्तस्योक्तेः, सामान्यसाधूनां तु नवमदशमप्रायश्चित्ताहापराधेष्वपि मूलान्तमेव प्रायश्चित्तं । तथाऽनवस्थाप्यं जघन्यतः षण्मासानुत्कृष्टतस्तु वर्षं, इदं च तीर्थकरगणधरप्रवचनाद्यधिक्षेपकारिणामाशातनाऽनवस्थाप्यमाश्रित्योक्तं, हस्तताडन-साधर्मिकान्यधार्मिकस्तैन्यकारि-प्रतिसेवनाऽनवस्थाप्यस्य तु जघन्यतो वर्षं उत्कृष्टतो द्वादश, एतच्चान्त्यद्वयं चतुर्दशपूर्विप्रथमसंहननिनोर्व्यवच्छिन्नयोर्व्यवच्छिन्नं, अष्टविधं स्याद् दुष्षमान्तम् ।

प्रतिक्रमणमित्यस्य चायमर्थः—" स्वस्थानाद्यत्परस्थानं, प्रमादस्य वशाद्गतः । तत्रैव क्रमणं भूयः,

प्रतिक्रमणमुच्यते ॥ १ ॥" तच्च मिथ्यादुष्कृतादिरूपं, उक्तं च—" पडिक्कमणं १ पडिअरणा २, पडिहरणा ३ वारणा ४ नियत्ती य ५ । निंदा ६ गरिहा ७ सोही ८, पडिक्कमणं अट्ठहा होइ ॥ १ ॥"

ततो विविनोपविश्य समभावस्थितेन सम्यगुपयुक्तमनसाऽनवस्थाप्रसङ्गभीतेन पदे पदे संवेगमापद्यमानेन दंशमशकादीन् देहेऽगणयता साधुना इह सर्वं पञ्चपरमेष्ठिनमस्कारपूर्वकं कर्म कर्त्तव्यं इत्यादौ स पठ्यते, समभावस्थेन प्रतिक्रमितव्यमित्यतः सामायिकसूत्रं "करेमि भंते ! सामाइयं" इत्यादि उच्चार्यते, तदनन्तरं मङ्गलार्थं "चत्तारि मंगल"मित्यादि भण्यते, अथ दैवसिकाद्यतीचाराणामोघालोचनार्थं " इच्छामि पडिक्कमिउं जो मे देवसिओ अइयारो कओ " इत्याद्यभिधीयते, विभागालोचनार्थं तु गमनागमनातिचारप्रतिक्रमणरूपा ईर्यापथिकी, अनु च शेषातिचारप्रतिक्रमणार्थं मूलसाधुप्रतिक्रमणसूत्रं पठ्यते, याव "तस्स धम्मस्स"त्ति । श्राद्धस्तु आचरणादिना नमस्कारः "करेमि भंते !०, इच्छामि पडिक्कमिउं०" इति सूत्रपूर्वकं श्राद्धप्रतिक्रमणसूत्रं कथयति । तदनु सकलातीचारभारनिष्क्रयाऽपगततद्भारो लघुभूत उत्तिष्ठति, तथा चाह—"कयपावो वि मणुस्सो, आलोइय निंदिय गुरुसगासे । होइ अइरेगलहुओ, ओहरिअभरुव्व भारवहो ॥ १ ॥"

इह च चतुर्द्धा पापकर्म स्पृष्टबद्धनिधत्तनिकाचितभेदात्, यथा सूचीपुञ्जोऽन्योन्यस्पृष्टस्तावत्तिष्ठति यावत्करादिः कस्यापि न लगति, तल्लगने तु विशीर्यते, एवं यत्कर्म सोपयोगस्यापि सहसाकारेण लग्नं निन्दामात्रक्रियया विलीयते, तदाद्यं, प्रसन्नचन्द्रस्येव १ । स एव सूचीपुञ्जो यदा गुणबद्धो वन्ये छोटित एव पृथग् भवति, एवं यत्कर्म विकथादिप्रमादजात-

प्राणातिपातादिदोषैर्बद्धमालोचनाप्रतिक्रमणाभ्यां क्षीयते, तद्बद्धं, मृगावत्यतिमुक्तकादेरिव २ । स एव बन्धबद्धतया चिरात्स्थानेन मिलल्लोहमलमिथो बद्धस्तैलम्रक्षणा-ग्नितापन-लोहघर्षणादिबहूपक्रमेणैव पृथक्स्यादेवं यत्कर्म भावनवशगमनादिदर्पेण उपेत्य करणरूपाकुट्या वाऽर्जितं चिरमनालोचनाज्जीवप्रदेशैः सह गाढं बद्धं तीव्रगर्हागुरुदत्तघोरषाण्मासिकादितपसा याति तन्निधत्तं, सिंहरथादेरिव ३ । स एवाग्निध्मातो लोहः पिण्डीभूतः, स चेद्घनैर्हत्वा घट्यते तदा नवीना एव भवन्ति, एवं जानता जीवेन कृतं यत्कर्म 'भव्यमेतत्कृतं, पुनरप्येवमेव विधास्यामी'ति पुनः पुनरनुमोदितं जीवप्रदेशैः सह गाढीकृतं प्राप्तं, तच्च यथा कृतं तथैव वेदनेन गुरुदत्तघोरतरतपसा वा क्षीयते, तच्चतुर्थं, श्रेणिकादेरिव ४ । तेष्विह निन्दालोचनाप्रतिक्रमणादिभिः स्पृष्टबद्धयोरपगमः ।

एवं च द्रव्यतो भावतश्चोत्थाय " अब्भुट्ठिओमि " इत्यादिसूत्रं प्रान्तं यावत्पठति, आह च-" अह उवविसित्तु सुत्तं, सामाइयमाइयं पढिय पयओ । ' अब्भुट्ठिओमि ' इच्चाइ, पढइ दुहउट्ठिओ विहिणा ॥ १ ॥ ततः प्रतिक्रान्तातिचारः श्रीगुरुषु स्वकृतापराधक्षमणकार्थं वन्दनकं ददाति, यदुक्तं—

पडिक्कमणे १ सज्झाए २, काउस्सग्गा ३ वराह ४ पाहुणए ५ ।
आलोयण ६ संवरणे ७, उत्तमट्ठे य ८ वंदणयं ॥ १ ॥

व्याख्या-प्रतिक्रमणे सामान्यतश्चत्वारि वन्दनकानि द्विकद्विकरूपाणि स्युः १ । स्वाध्याये-वाचनादिविषये त्रीणि " सज्झाए वंदित्ता पट्ठवेइ पढमं १, पट्ठविए पवेयंतस्स बीयं २, पच्छा उद्दिट्ठं समुद्दिट्ठं पढइ, उद्देससमुद्दे-

सव्वंदणाणमिहेवंऽतब्भावो । तओ कालवेलाए वंदिउं पडिक्कमइ, एवं तइयं ३" पूर्वाह्णे सप्त अपराह्णेऽपि सप्त । अनुज्ञावन्दनानां स्वाध्यायेष्वेवान्तर्भावात् । एवमेतानि ध्रुवाणि प्रत्यहं १४ भवन्ति १ । कायोत्सर्गोऽत्रैव वक्ष्यमाणो ह्यादिलोगस्संरूपः, यो वा विकृतिपरिभोगायाचाम्लविसर्जनार्थं क्रियते २ । अपराधो गुरुविनयलङ्घनरूपो, यतस्तं वन्दित्वा क्षामयति, पाक्षिकवन्दनान्यपराधे पतन्ति ४। प्राघूर्णके ज्येष्ठे समागते ५ । आलोचनायां विहारापराधभेदभिन्नायां ६ । संवरणे भुक्तानन्तरप्रत्याख्यानेऽभक्तार्थं गृह्णतः संवरणं वा, तस्मिन् ७ । उत्तमार्थेऽनशनसंलेखनायां ८ । इति पञ्चप्रभृतिषु साधुषु सत्सु त्रीन् श्रीगुरुप्रभृतीन् क्षमयेत् पञ्चकमध्ये तु ज्येष्ठमेवैकं, आचीर्णाभिप्रायेणेदमुक्तं, अन्यथा गुरुमादिं कृत्वा ज्येष्ठान् क्रमेण सर्वान् क्षमयेत् । [ इदं च वन्दनक 'मल्लियावणवंदणय'मित्युच्यते, आचार्यादीनामाश्रयणायेत्यर्थः, इत्युक्तं प्रवचनसारोद्धारवृत्तौ, ततश्च ' इत्यधिकं पालणपुरीयप्रतौ । ]

तदनु च कायोत्सर्गकरणार्थं "पडिक्कमणे १, सज्झाए २, काउस्सग्गा०" इत्यादिवचनाद्वन्दनकदानपूर्वं भूमिं प्रमृज्य "जे मे केइ कसाया" इत्याद्यक्षरसूचितकषायचतुष्टयात्प्रतीपक्रमणमनुकुर्वन्निव पश्चात्पदैरवग्रहाद्बहिर्निःसृत्य "आयरियउवज्झाए" सूत्रं पठति । आह च–" दाऊण वंदणं तो, पणगाइसु जइसु खामए तिन्नि । किइकम्मं करिय ठिओ, सड्ढो × गाहातिगं पढइ ॥ १ ॥" आलोचनाप्रतिक्रमणाभ्यामशुद्धानां चारित्रादिबृहदतीचाराणां शुद्ध्यर्थं कायोत्सर्गविधानं, तत्राद्यश्चारित्रशुद्ध्यर्थं कायोत्सर्गो विधीयते, चारित्रं च कषायविरहेण शुद्धं भवति,

× 'सड्ढो' इत्यनेनात्रापि श्राद्धानामेवास्य भणनीयता प्रोक्ता, यश्च योगशास्त्रवृत्तावयं शब्दो निष्काशितो मुद्रापकसंशो.

तदभावे तस्यासारत्वात्, उक्तं च—“सामण्णमणुचरंतस्स, कसाया जस्स उक्कडा हुंति । मन्नामि उच्छुपुप्फं व, निप्फलं तस्स सामण्णं ॥ १ ॥ दुहुवि उज्जममाणं०” इत्यादि च । ततश्चारित्रप्रकर्षकृते कषायोपशमाय च “आयरिउवज्झाए” इत्यादिगाथात्रयं पठित्वा चारित्राचारातिचाराणां “पडिक्कमणासुद्धाण” मिति वचनात्प्रतिक्रमणेनाशुद्धानां विशुद्धिनिमित्तं कायोत्सर्गं चिकीर्षुः “करेमि भंते ! सामाइयं” सूत्रत्रयं पठति, चतुर्विंशतिस्तवद्वयं चारित्रातिचारविशुद्ध्यर्थं कायोत्सर्गे चिन्तयति । आह च—“इय सामाइय उस्सग्गे, सुत्तमुच्चरिय काउस्सग्गठिओ । चिंतइ उज्जोअदुगं, चरित्त अइयारसुद्धिकए ॥ १ ॥”

इह चाह—ननु “करेमि भंते ! सामाइय” मिति सूत्रस्यादौ प्रतिक्रमणसूत्रकथनक्षणे तृतीयवारं पुनरिहोच्चारणं पक्षाभ्यां तत्स्वपूर्वोक्तेर्विरुद्धं विहितं, यत उक्तं सेनप्रश्नोत्तरे—“आयरियउवज्झाए” इत्यादिगाथात्रयं केचन न पठन्ति, वदन्ति च योगशास्त्रवृत्तौ “काउण वंदणं तो” इत्यत्र श्राद्धानामेव प्रोक्तमस्ति, न यतीनामिति प्रश्नोऽत्रोत्तरं—योगशास्त्रवृत्तिजीर्णपुस्तकपट्कं विलोकितं, तत्र सर्वत्रापि “काऊण वंदणं तो” इति गाथायाः पाठः ‘सढो’ इति पदेनैव संयुक्तो दृश्यते, तत्र ‘अशठा’ इति व्याख्यानेन साधुश्राद्धयोः समानमेवावश्यककर्तव्यं दृश्यते, तथापि मानदेवसूरिकृतसामाचार्यां अवचूर्णौ वैतद्गाथात्रयं केषाञ्चिन्मते साधवो न पठन्तीति प्रोक्तमस्ति, तन्मतान्तरम् ॥ १४५ ॥” उ. ३ पत्र ६२ ॥ अत्र ‘ढ’ कारस्यैकत्वं विधाय ‘सढो’ इति शब्दोल्लेखनं ‘अशठा’ इत्यर्थनिष्काशनं तथा ‘सढो’ इत्यत्र स्पष्टं एकवचने ‘अशठा’ इति बहुवचनान्ततया निर्देशश्चापि स्वमतपोषणरसिकतैव व्यनक्ति, वस्तुतो विमृश्यमाणे ‘सड्ढो’ इति शब्दस्तस्य चार्थः ‘श्राद्ध’ इत्येव युक्तियुक्तः ।

प्रतिक्रमण-हेतुगर्भः । ॥ ११ ॥

कायोत्सर्ग-त्रयस्य हेतवः ।

किमर्थं ? उच्यते–सर्वमपि धर्मानुष्ठानं समतापरिणामे स्थितस्य सफलं भवतीति प्रतिक्रमणस्यादौ मध्येऽवसाने च पुनः पुनस्तत्स्मृत्यर्थं तदुच्चारणं । आह च—" आइमकाउस्सग्गे, पडिक्कमंतो अ काउ सामइयं । तो किं करेइ बीयं, तइयं च पुणो वि उस्सग्गे ॥ १ ॥ समभावम्मि ठियस्स, उस्सग्गं करिय तो पडिकमई । एमेव य समभावे, ठियस्स तइयंपि उस्सग्गे ॥ २ ॥ सज्झायझाणतवओ-सहेसु उवएसथुइपयाणेसुं । संतगुणकित्तणेसुं, न हुंति पुणरुत्तदोसाओ ॥ ३ ॥ " चारित्राचारविशुद्धिहेतुं कायोत्सर्गं च पारयित्वा " जुगवंपि समुप्पन्नं, सम्मत्तं अहिगमं विसोहेइ । जह कयग १ मंजणाई २, जल१दिट्ठीओ २ विसोहंति ॥ १ ॥ जहजह सुज्झइ सलिलं, तह तह रूवाइं पासइ दट्ठा । इय जहजह तत्तरुई, तहतह तत्तागमो होइ ॥ २ ॥ कारणकज्जविभागो, दीवपगासाण जुगवजम्मेवि । जुगवुप्पन्नंपि तहा, हेऊ नाणस्स सम्मत्तं ॥ ३ ॥ " इत्यादिहेतुभिर्ज्ञानाद्दर्शनं गरिष्ठं, इत्यादि कारणैर्ज्ञानाचारात्पूर्वं दर्शनाचारविशुद्ध्यर्थं भरतक्षेत्रोत्पन्नत्वेनासन्नोपकारित्वाच्छ्रीऋषभादिस्तुतिरूपं चतुर्विंशतिस्तवं " सव्वलोए अरिहंतचेइयाणं "मित्यादिसूत्रं च पठित्वा तदर्थमेव कायोत्सर्गमेकचतुर्विंशतिस्तवचिन्तनरूपं कुर्यात् । तं च तथैव पारयित्वा श्रुतज्ञानाचारविशुद्ध्यर्थं " पुक्खरवरदीवड्ढे " इत्यादिसूत्रं " सुअस्स भगवओ करेमि काउस्सग्गं " मित्यादि च पठित्वैकचतुर्विंशतिस्तवचिन्तनरूपं कायोत्सर्गं कुर्यात् । पारयित्वा च तं ज्ञानदर्शनचारित्राचारनिरतिचरणसमाचरणफलभूतानां सिद्धानां " सिद्धाणं बुद्धाणं "मिति सिद्धस्तवं पठति । आह च—
"विहिणा पारिय सम्मत्त-सुद्धिहेउं च पढिय उज्जोयं । तह सव्वलोअ अरिहंत-चेइयाराहणुस्सग्गं ॥ १ ॥

॥ ११ ॥

काउं उज्जोअगरं, चिंतिय पारेइ सुद्धसम्मत्तो । पुक्खरवरदीवड्ढं, कड्ढइ सुआराहणानिमित्तं ॥ २ ॥ पुण पणवीसुस्सासं, काउस्सग्गं कुणइ पारए विहिणा । तो सयलकुसलकिरिया-फलाण सिद्धाण पढइ थयं ॥३॥ ”

इह चतुर्विंशतिस्तवद्वयचिन्तनरूपो द्वितीयश्चारित्राचारविशुद्धिहेतुः कायोत्सर्गः, अस्मिंश्च पूर्वोक्तयुक्त्या चारित्राचारस्य ज्ञानाद्याचारेभ्यो वैशिष्ट्यादिना चतुर्विंशतिस्तवद्वयचिन्तनं सम्भाव्यते, नाग्रेतनयोः, तृतीयो दर्शनाचारशुद्धिहेतुश्चतुर्थो ज्ञानाचारविशुद्धिहेतुः । आह च—“ नमुक्कार चउवीसग-किइकम्मालोअणं पडिक्कमणं । किइकम्म दुरालोइय-दुप्पडिक्कंते य उस्सग्गो ॥ १ ॥ एस चरित्तुस्सग्गो, दंसणसुद्धीइ तइयओ होइ । सुअनाणस्स चउत्थो, सिद्धाण थुई य किइकम्मं ॥ २ ॥ ” दिवसातिचारचिन्तनार्थं प्रथमश्चारित्राचारशुद्धिहेतुः कायोत्सर्गः, द्वितीयोऽपि चतुर्विंशतिस्तवद्वयचिन्तनरूपस्तद्धेतुरेव कायोत्सर्गः “ दुन्नि य हुंति चरित्ते, दंसणनाणे य इक्किक्को अ ” इति वचनात् ।

इह च सकलकुशलानुष्ठानफलभूताः सिद्धिपदप्राप्ताः सिद्धा एव । यदाह—“ जिणधम्मो मुक्खफलो, सासयसुक्खो जिणेहिँ पन्नत्तो । नरसुरसुहाइं अणुसं-गियाइं इह किसिपलालुव्व ॥ १ ॥ ” साम्राज्यस्वर्गाद्युपभोगसुखानां च सम्यक्फलत्वं न स्यात्, यत उक्तं—“ कह तं भण्णइ ? सुक्खं, सुचिरेणवि० ” इत्यादि । सर्वासामपि क्रियाणां फलं पर्यवसाने एव स्यात्, नार्वाक्, वृक्षादावपि फलस्य तथा दर्शनात् । उक्तं च—“ मूलाउ खंधप्पभवो दुमस्स, खंधाउ पच्छा समुविंति साहा । साहप्पसाहा विरुहंति पत्ता, तओसि पुप्फं च फलं रसो अ ॥ १ ॥ ” तथा च सिद्ध-सकलकुशलानुष्ठानस्य सिद्धाः सम्यक्फलमिति, ततो युक्तं ज्ञानदर्शनचारित्रफलभूतसिद्धस्मरणं, तदनु श्रीवीरं वन्दते, सम्प्रति

तस्य तीर्थसद्भावेन विशेषतः स्मरणीयत्वात् । तदनु महातीर्थत्वादिनोज्जयन्तालङ्करणं श्रीनेमिं, ततोऽपि चाष्टापदनन्दीश्वरादिबहुतीर्थनमस्काररूपां " चत्तारि अट्ठ दस "त्यादि पठन्ति ।

एवं चारित्राचार–दर्शनाचार–ज्ञानाचाराणां शुद्धिं विधाय सकलधर्मानुष्ठानस्य श्रुतहेतुकत्वात्तस्य समृद्ध्यर्थं ' सुअदेवयाए करेमि काउस्सग्गं, अन्नत्थे 'त्यादि पठित्वा श्रुतदेवताकायोत्सर्गं कुर्यात्, तत्र च नमस्कारं चिन्तयति, देवताराधनस्य [illegible] एवार्थं कायोत्सर्ग इत्यादि हेतुः सम्भाव्यः । पारयित्वा च तस्याः स्तुतिं पठति " सुअदेवया भगवई " इत्यादि ।

* [ ननु श्रुतरूपदेवतायाः श्रुतसमृद्ध्यर्थं युक्तः कायोत्सर्गः, श्रुतभक्तेर्ज्ञानावरणादिकर्मक्षपणद्वारा श्रुतसमृद्धिहेतुत्वेन सुप्रतीत्वात्, श्रुताधिष्ठातृदेवतायास्तु व्यन्तरादिप्रकाराया न युक्तः, तस्याः परकर्मक्षपणे असमर्थत्वेन श्रुतसमृद्ध्यहेतुत्वात्, श्रुतरूपदेवतायास्तु तृतीयकायोत्सर्गे स्मृतिः कृतैव, तत्र, श्रुताधिष्ठातृदेवतागोचरशुभप्रणिधानस्यापि स्मर्तुः कर्मक्षयहेतुत्वेनाभिहितत्वात्, तदुक्तं–" सुयदेवयाइ जीए, संभरणं कम्मक्खयकरं भणियं । नत्थित्ति अकज्जकरी, न एवमासायणा तीए ॥ १ ॥ " एवं च क्षेत्रदेवताऽपि स्मृतिमर्हति यस्याः क्षेत्रे स्थितिर्विधीयते, ततस्तस्याः कायोत्सर्गानन्तरं स्तुतिं भणति, यत्र प्रत्यहं क्षेत्रदेवतायाः स्मरणं तत्तृतीयव्रतेऽभीक्ष्णावग्रहयाचनरूपभावनायाः सत्यापनार्थं सम्भाव्यते । * [ ननु श्रुतदेवता-क्षेत्रदेवतादीनां कायोत्सर्गकरणं न युक्तं, मिथ्यात्वप्रसक्तेः । नैवं, पूर्वधरादिकालेऽपि एतत्कायोत्सर्गस्य

* नास्त्येतच्चिह्नान्तर्विन्यस्तौ पाठौ प्रह्लादनपुरीयप्रतौ ।

कायोत्सर्गत्रयेऽपि भिन्नलोगस्सचिन्तने हेतवः ।

क्रियमाणत्वेन सम्भाव्यमानत्वात्, यतः–" आवस्सयलहुगुरु–वित्तिचुण्णिभासेसु पक्खियाईसु । पवयण-सारुद्धारे, सुयदेवयाइ उस्सग्गो ॥ १ ॥ " तथा " प्रणिपत्य जिनवरेन्द्रं, वीरं श्रुतदेवतां गुरून् साधून् । आवश्यकस्य विवृतिं, गुरूपदेशादहं वक्ष्ये ॥ २ ॥ " इति श्रीआवश्यकबृहद्वृत्तौ हरिभद्र[सूरि]कृतो नमस्कारः । " आयरणा सुयदेवय–माईणं होई उस्सग्गो ॥ " इति पञ्चवस्तुके । श्रीवीरनिर्वाणाद्वर्षसहस्रे पूर्वश्रुतं व्यवच्छिन्नं, श्रीहरिभद्रसूरयस्तदनु पञ्चपञ्चाशता वर्षैर्दिवङ्गताः, ग्रन्थकरणकालात्प्राचरणायाः पूर्वमेव सम्भवात् श्रुतदेवतादिकायोत्सर्गः पूर्वधरकालेऽपि सम्भवति, अतो युज्यते कर्तुम् ।]

ततः पञ्चमङ्गलभणनपूर्वकं सण्डासकं प्रमृज्योपविशति, यदुक्तं–" अह सुअसमिद्धिहेउं, सुअदेवीए करेइ उस्सग्गं । चिंतेइ नमुक्कारं, सुणइ व देई व तीइ थुइं ॥ १ ॥ एवं खेत्तसुरीए, काउस्सग्गं च कुणइ देइ थुइं । पढिउं च पंचमंगल–मुवविसइ पमज्ज संडासं ॥ २ ॥ " उपविश्य च पूर्ववद्विधिना मुखवस्त्रिकां कायं च प्रतिलिख्य श्रीगुरूणां वन्दनके दत्वा–" इच्छामो अणुसट्ठि "मिति + भणित्वा जानुभ्यां स्थित्वा कृताञ्जलि" र्नमोऽर्हत्सिद्धे "ति पूर्वकं स्तुतित्रयं पठति । आह च–" पुव्वविहिणेव पेहिय, पुत्तिं दाऊण वंदणं गुरुणो । इच्छामो अणुसट्ठिंति, भणिय जाणूहिं तो ठाइ ॥ १ ॥ "

इदं च पूर्वोक्तवन्दनकदानं श्रीगुर्वाज्ञया कृतावश्यकस्य विनेयस्य ' मया युष्माकमाज्ञया प्रतिक्रान्त 'मिति विज्ञपनार्थं,

+ अनेनाधुनिकानां " सामाइयचउवीसत्थओ " इत्यादिभणनं शास्त्रोत्तीर्णं स्वपूर्वजोक्त्यापि विरुद्धम् ।

लोकेऽपि च राजादीनामादेशं विधाय प्रणामपूर्वकं तेषामादेशकरणं निवेद्यते, एवमिहापि ज्ञेयं, यदाह—

"सुकयं आणत्तंपिव, लोए काऊण सुकयकिइकम्मा । वड्ढंतिआ थुईओ, गुरुथुइगहणे कए तिन्नि ॥ १ ॥"

व्याख्या—यथा राज्ञा मनुष्या आज्ञप्तिकया प्रेषिताः प्रणम्य यान्ति, तां च सुकृतामप्याज्ञप्तिं कृत्वा पुनः प्रणम्य निवेदयन्ति, एवं साधवो गुरुसमादिष्टा वन्दनपूर्वं चारित्रादिविशुद्धिं कृत्वा पुनः सुकृतकृतिकर्माणः सन्तो गुरोर्निवेदयन्ति । ततो गुरवः विनयहेतोस्तावत्तिष्ठन्ति यावद् गुरवः प्रथमस्तुतिग्रहणं कुर्वन्ति, समाप्तायां च स्तुतौ वर्द्धमाना स्तुतिः पठन्ति । एतच्चैवं सम्भाव्यते वन्दनकान्ते " इच्छामो अणुसट्ठि " मिति दर्शनात् । एतदर्थश्चायं–' इच्छामो 'ऽभिलषामोऽनुशास्ति–गुर्वाज्ञां प्रतिक्रमणं कार्यमित्येवंरूपां, तां च वयं कृतवन्तः स्वाभिलाषपूर्वकं, न तु राजवेष्ट्यादिन्यायेन, इत्थं सम्भावना-विधानं च "इच्छामो अणुसट्ठि" मिति भणनानन्तरं श्रीगुरूणामादेशस्य श्रवणात् । अन्यत्र चायं दृश्यते, यथा सम्यक्त्व-सामायिकाद्यारोपणेऽङ्गोद्देशादौ वा, एवं च प्रतिक्रमणकरणं सम्पूर्णं समजनि, तत्सम्पूर्णीभवनाच्च सञ्जातनिर्भरप्रमोदप्रसरा-कुला वर्द्धमानस्वरेण वर्द्धमानाक्षरं श्रीवर्द्धमानस्तुतित्रयं " नमोऽस्तु वर्द्धमानाये " त्यादिरूपं श्रीगुरुभिरेकस्यां स्तुतौ, पाक्षि-कादिप्रतिक्रमणे तु श्रीगुरुचरणयोर्विशेषबहुमानसूचनार्थं तिसृष्वपि स्तुतिषु भणितासु सतीषु सर्वे साधवः श्राद्धाश्च युगपत् पठन्ति ।

" बालस्त्रीमन्दमूर्खाणां, नृणां चारित्रकाङ्क्षिणाम् । अनुग्रहार्थं सर्वज्ञैः, सिद्धान्तः प्राकृतः कृतः ॥ १ ॥ "

इत्याद्युक्तिभिः स्त्रीणां संस्कृतेऽनधिकारित्वसूचनान्नाटकादिष्वपि प्रायः तदालापानां प्राकृतादिभाषयैव दर्शनात्ताभ्यः श्रा-विकाश्च " नमोऽर्हत्सिद्धाचार्ये " त्यादिसूत्रं न पठन्ति, " नमोऽस्तु वर्द्धमानाये " त्यादिस्थाने " संसारदावानले "

स्यादिरूपं स्तुतित्रयं च पठन्ति, रात्रिकप्रतिक्रमणे तु " विशाललोचनदल " मित्यस्य स्थाने ।

× [ किञ्च-" तुच्छा गारवबहुला, चलिंदिया दुब्बला धिईए य ।
इअ अइसेसज्झयणा, भूआवाओ अ नेत्थीणं ॥ १ ॥ "

व्याख्या—दृष्टिवादे हि बहवो विद्याऽतिशयाः सर्वकामदा वर्ण्यन्ते, स्त्री च स्त्रीस्वभावत्वात्तुच्छा-ऽल्पसत्त्वा, अल्पायामपि ऋद्धौ गर्वबहुला (चलेन्द्रिया) 'भूत्वा' चित्तावष्टम्भेन दुर्बला, तेन-" संघमाइअकज्जेसु जस्सेगस्स कुलस्स वा गामस्स वा जाव रायहाणीए वा समणे कयसंकप्पे आसुरुत्ते अप्पसत्ते अप्पसत्थलेसे विसमसुहासणत्थे उवउत्ते समाणे उट्ठाणसुअमज्झयणं परिअट्टेइ इक्कं दो तिन्नि वा वारे, ताहे से कुले वा गामे वा जाव रायहाणी वा ओहयमणसंकप्पे विलवंते दुअं पहावेंते उट्ठेइ, उव्वसइत्ति वुत्तं भवइ । तथा सम्मत्ते कज्जे तस्सेव कुलस्स वा गामस्स वा जाव रायहाणीए वा से चेव समणे कयसंकप्पे तुट्ठे पसन्ने पसत्थलेसे समसुहासणत्थे उवउत्ते समाणे समुट्ठाणसुअमज्झयणं परिअट्टेइ इक्कं दो तिन्नि वा वारे, ताहे से कुले वा गामे वा जाव रायहाणी वा पहट्ठचित्ते सुप्पसत्थमंगलकलकलं कुणमाणे मंदाए गईए सललियं आगच्छंति समुट्ठाइ-आवसइत्ति वुत्तं भवइ । एवं कयसंकप्पस्स परिअट्टंतस्स पुव्वुट्ठिअं पि समुट्ठेइ ।" तथा अरुणो नाम देवस्तत्समुपपातहेतुररुणोपपातो, यदा तदध्ययनमुपयुक्तः सन् श्रमणः परिवर्त्तयति तदाऽसावरुणो

× नास्त्येतच्चिन्हान्तर्गतः पाठः प्रल्हादनपुरीआदर्शे ।

देवः स्वसमयनिबद्धत्वाच्चलितासनः सम्भ्रमोद्भ्रान्तलोचनः प्रयुक्तावधिस्तद्विज्ञाय हृष्टः प्रहृष्टचलचपलकुण्डलधरो दिव्यया द्युत्या दिव्यया विभूत्या दिव्यया गत्या यत्रैवासौ भगवान् श्रमणस्तत्रैवोपागच्छति, उपागत्य च भक्तिभरावनतवदनो विमुक्तवरकुसुमवृष्टिरवपतति, अवपत्य च तदा तस्य श्रमणस्य पुरतः स्थित्वाऽन्तर्हितः कृताञ्जलिक उपयुक्तः संवेगविशुध्यमानाध्यवसानः शृण्वँस्तिष्ठति, समाप्ते च भणति– " सुस्वाध्यायितं सुस्वाध्यायितं इति वरं वृणिष्व "ति, ततोऽसाविहलोकनिष्पिपासः समतृणमणिलेष्टुकाञ्चनः सिद्धिवधूनिर्भरानुगतचित्तः श्रमणः प्रतिभणति ' न मे वरेणार्थ ' इति । ततो देवोऽधिकतरजातसंवेगः प्रदक्षिण्य वन्दित्वा नमस्यित्वा प्रतिगच्छति । एवं वरुणोपपातादिष्वपि वाच्यं । इत्यादि स्वरूपाणि सातिशयानि उत्थान–समुत्थानश्रुतारुण–वरुणोपपातादीन्यध्ययनानि, भूतवादश्च–दृष्टिवादः स्त्रीणां नानुज्ञातानि, इत्याद्युक्तेः स्त्रीणां पूर्वाध्ययनेऽनधिकारित्वा"न्नमोऽर्हत्सिद्धा०, नमोऽस्तु वर्द्धमाने "त्यादीनां च पूर्वान्तर्गतत्वेन सम्भाव्यमानत्वाच्च पठन्तीत्याहुः अन्यथा वा यथाम्नायं तदकथने ] कारणं सुधियाऽभ्यूह्यम् ।

यच्च श्रीगुरुकथनावसरे प्रतिस्तुतिप्रान्ते " नमो खमासमणाणं " इति गुरुनमस्कारः साधुश्राद्धादिभिर्भण्यते तद्द्रूपाद्यालापेषु प्रतिवाक्यप्रान्तं जीवेत्यादिभणनवत् श्रीगुरुवचःप्रतीच्छादिरूपं सम्भाव्यते । तथेह श्रीवर्द्धमानस्वामिनस्तीर्थमिदं, तस्याज्ञया चेदं प्रतिक्रमणादिकरणं, निर्विघ्नं च तत्सम्पूर्णीभवने हर्षेण मङ्गलार्थं च श्रीवर्द्धमानस्तुतिपाठः । अयं च कृतज्ञानां व्यवहारः, यत् स्वसमीहितशुभकार्यनिर्विघ्नभवने च श्रीदेवगुरुबहुमाननादिवर्द्धमानस्वरेण स्तुतित्रयपाठश्च हर्षातिरेकेण । अयं च न्यायो लोकेऽपि दृश्यते, यथा–राज्ञः शत्रुजयादौ विवाहादौ वा हर्षेण विविधवादित्रवादनोद्भैः

स्वरगीतनृत्यपूज्यपूजनादि ।

स्तुतित्रयपाठानन्तरं शक्रस्तवपाठः, तत उदारस्वरेणैकः श्रीजिनस्तवं कथयति, अपरे च सर्वे सावधानमनसः कृताञ्जलयः शृण्वन्ति । स्तवभणनान्तरं च "वरकनके"त्यादि पठित्वा चतुर्भिः क्षमाश्रमणैः श्रीगुर्वादीन् + वन्दते । अत्र च श्रीदेवगुरुवन्दनं "नमोऽर्हत्सिद्धे"त्यादेरारभ्य चतुःक्षमाश्रमणप्रदानं यावज्ज्ञेयं, श्राद्धस्य तु "अड्ढाइज्जेसु" इत्यादिभणनावधि ज्ञेयं । सर्वमपि धर्मानुष्ठानं श्रीदेवगुरुभक्तिबहुमाननादिपुरस्सरं सफलं भवतीति प्रतिक्रमणस्य प्रारम्भे सम्पूर्णीभवने च श्रीदेवगुरुवन्दनमिति, 'आद्यन्तग्रहणे मध्यस्यापि ग्रहण'मिति न्यायेन तद्भक्तिः सार्वत्रिकी ज्ञेया, यथा–शक्रस्तवे "नमुत्थुण" मित्यत्रादौ "नमो जिणाण" मित्यन्ते च "नमो" इत्यस्य स्थापनेन शक्रस्तवे प्रतिपदं तत्पाठपरिज्ञापनं, यथा वा पञ्चदण्डकपुरस्सरं देववन्दनाधिकारे शक्रस्तवभणनमाद्यावन्ते * च दृश्यते, एवं सर्वत्रापि ज्ञेयम् ।

+ अनेन 'भगवानह'मादेर्न, किन्त्वाचार्यादेरेव ग्रहणमत्रेति ।

* सर्वेत: प्रागीर्यां प्रतिक्रम्य पश्चाच्छक्रस्तवकथकानामेतद् ग्रन्थकारोक्त्यनुसरणं न भवति, किन्तु "एवञ्च पञ्चशक्रस्तवं भवति–उत्कृष्टचैत्यवन्दनया वन्दितुकामः साधुः श्रावको वा × × × योगमुद्रया जिनसम्मुखं शक्रस्तवमस्खलितादिगुणोपेतं पठति, तदनु ऐर्यापथिकीप्रतिक्रमणं करोति, ततः पञ्चविंशत्युच्छ्वासमानं कायोत्सर्गं कृत्वा पारयित्वा 'लोगस्सुज्जोयगरे' इत्यादि परिपूर्णं भणित्वा जानुनी च भूमौ निवेश्य योजितकरकुड्मलस्तथाविधमुक्तविकुसजिननमस्कारभणनपूर्वं शक्रस्तवादिभिः पञ्चभिर्दण्डकैर्जिनमभिवन्दते, चतुर्थस्तुतिपर्यन्ते पुनः शक्रस्तवमभिधाय द्वितीयवेलं तेनैव क्रमेण वन्दते, तदनु चतुर्थशक्रस्तवभणनानंतरं स्तोत्रं पवित्रं भणित्वा

प्रतिक्रमण-हेतुमर्मः । ॥ १५ ॥

ईर्याप्रति-क्रान्तेः प्राक् शक्रस्तव-भणनीयत्वम् । ॥ १५ ॥

पूर्वं प्रतिक्रमणे ज्ञानदर्शनचारित्राचाराणां शुद्ध्यर्थं कायोत्सर्गेषु कृतेष्वपि पुनरिह “ द्विबद्धं सुबद्धं भवती ”ति न्यायेन प्राणातिपातादिविरमणातिचारविशुद्ध्यर्थं चतुश्चतुर्विंशतिस्तवचिन्तनरूपं दैवसिकप्रायश्चित्तविशुद्ध्यर्थं कायोत्सर्गं कुरुते । उक्तं च–“ गुरुथुइगहणे थुइतिण्णि वद्धमाणक्खरस्सरा पढइ । सक्कत्थयं थवं पढिय, कुणइ पच्छित्त उस्सग्गं ॥ १ ॥ पाणिवहमुसावाए, अदत्तमेहुणपरिग्गहे चेव । सयमेगंतु अणूणं, ऊसासाणं हविज्जाहि ॥ २ ॥ ” अयं च कायोत्सर्गः सामाचारीवशेन कैश्चित्प्रतिक्रमणस्यान्ते कैश्चिदादौ × क्रियते इति ।

तदनु तथैव पारयित्वा चतुर्विंशतिस्तवं च मङ्गलार्थं पठित्वा क्षमाश्रमणद्वयपूर्वं मण्डल्यामुपविश्य सावधानमनसा स्वाध्यायं कुरुते मूलविधिना पौरुषी यावत्सम्पूर्णा स्यात् । यदाह–“ पढमं पोरिसि सज्झायं, बीयं झाणं झियायई । तइयाए निद्दमुक्खं तु, सज्झायं तु चउत्थीए ॥ १ ॥ उक्कोसो सज्झाओ, चउदसपुव्वीण बारसंगाई । इत्तो परिहाणीए, जाव तयत्थो नमुक्कारो ॥ २ ॥ बारसविहम्मि वि तवे, सब्भिंतरबाहिरे कुसलदिट्ठे । नवि अत्थि नवि अ होही, सज्झायसमं तवोकम्मं ॥ ३ ॥ ”

ननु प्रतिक्रमणं पञ्चविधाचारविशुद्ध्यर्थं प्रागुक्तं, अत्र तु ज्ञानदर्शनचारित्राचारत्रयस्य यथास्थानं शुद्धिरुक्ता, न तपो

---

‘ जय वीयराय ’ इत्यादिकं च प्रणिधानं कृत्वा पुनः शक्रस्तवमभिधत्ते इति ” एतत्प्रवचनसारोद्धार[ पत्र २० ]वृत्त्युक्त्या सर्वतः प्राक् शक्रस्तवमभिधायेर्याप्रतिक्रामकाणामेव भवत्येतद्ग्रन्थकारकथनानुसरणम् ।

× ज्ञायतेऽनेन कथनेन, यदुत ग्रन्थकारसमयेऽयं कायोत्सर्गः प्रागपि दैवसिप्रतिक्रमणात् कैश्चित् क्रियमाणमासीत् ।

वीर्याचारयोः, उच्यते-एतच्छुद्धिर्ज्ञानाद्याचारशुद्ध्या नान्तरीयका इति प्रतिपादितैव, तथाहि—सायं साधोः कृतचतुर्विधाहारप्रत्याख्यानस्य प्रतिक्रमणं स्यात्, श्राद्धस्यापि कृतप्रत्याख्यानस्य तद्भवति। प्रातस्तु षाण्मासिकतपसः प्रभृति यथाशक्तितपः करोति, अभ्यन्तरं तपस्तु कायोत्सर्गस्वाध्यायादिरूपं प्रतिक्रमणे प्रतीतमेव, एवं च स्फुटं तपआचारशुद्धिरुक्ता, यथाविधि यथाशक्ति च प्रतिक्रमतो वीर्याचारशुद्धिरपि प्रतीतैव, उक्तं च प्राक् "गुणधारणरूवेण" मित्यादि।

तथा काले आवश्यकाकरणे चतुर्लघुः, मण्डल्यप्रतिक्रान्तौ कुशीलैः सह प्रतिक्रान्तौ च चतुर्लघुः, निद्राप्रमादादिना प्रतिक्रमणे न मिलितस्तत्रैकस्मिन् कायोत्सर्गे भिन्नमासः द्वयोर्लघुमासस्त्रिषु गुरुमासः, तथा गुरुभिरपारिते कायोत्सर्गे स्वयं यदि पारयति तदा गुरुमासः, सर्वेष्वपि कायोत्सर्गेषु चतुर्लघुः, एवं वन्दनकेष्वपि योज्यं इति व्यवहारे।

तथा साधवः प्रतिक्रमणानन्तरं तथैवान्तर्मुहूर्त्तमात्रं कालमासते, कदाचिदाचार्याः खल्वपूर्वां सामाचारीं प्ररूपयेयुरपूर्वं वाऽर्थपदमित्युक्तं श्रीओघनिर्युक्तिवृत्तौ * [ तथा प्रतिक्रमणकारिणा श्रमणेन श्रावकेण च प्रतिपदं प्रवर्द्धमानपरमवैराग्यरङ्गेण निर्जरार्थिना सम्यग्योगत्रिकशुद्धिविधौ विशिष्य यतितव्यं, तथाहि—मनसा भगवद्भक्तिरागसागरतरङ्गितेन सम्यक्पदसम्पदर्थपरिचिन्तनं, वचसा तु उदारसुकुमारस्वरेणान्यूनाधिकालापकोच्चारणं, गात्रेण श्रीभागवतमतप्रवर्द्धमानबहुमानवशप्रसृमररोमाञ्चनिचयकञ्चुकितस्वगात्रेण, करचरणादौ यथायोग्यजिनयोगमुद्रादिविनियोगयथास्थानमूर्द्धावनमनगुर्वत्रहगतिप्रत्यागत्यादिहेतुकभूतलसण्डाशकप्रमार्जनप्रभृतितत्तत्सम्प्रसमुच्चारेण समकालमेव विधेयं, एवमेव हि त्रिकशुद्ध्या विधीयमानं

* पतितोऽयैतच्चिह्नान्तर्गतः पाठोऽस्मद्गुरुवर्यानुयोगाचार्यश्रीमत्केशरमुनिजीगणिवरचित्कोदीयादर्शे अहारनपुरीयप्रतिकृतावपि च।

प्रतिक्रमण-
हेतुगर्भः ।

॥ १६ ॥

प्रतिक्रमणाद्यनुष्ठानं रत्नत्रयप्राप्तिलक्षणान्तरलाभाय प्रभवति । दृश्यते हि नटादयो बाह्यलाभसापेक्षा अपि साक्षात्त्रिकं सत्यापयन्तः, तथाहि–यथैव हि श्रीरागादि समाश्रियते गीतगानं तथैव वाद्यते तालमर्दलमृदङ्गवेणुवीणाद्यं वाद्यमपि, यथैव च वाद्यं तथैवाङ्गचालनहस्तचालनपदन्यासभ्रूक्षिप्तो नाट्यविधिरपि, तथैव हि तेषां चतुरचेतश्चमत्कार[प्राप]णं विशेषमाहश्च भवति, नान्यथा, उक्तं च "तालः पद्भ्यां वाक्यभङ्गीभुजाभ्या-मं[गे] गेयं लोचनाभ्यां च हावाः । श्रोतुश्चित्ते भाव्यते यत्र साक्षा-त्तद्धै नृत्यं नृत्यमन्यद्विडम्बः ॥ १ ॥" अत एव चान्तरङ्गं ( ! ) शेषलाभार्थिना त्रिकरणशुद्ध्यै विशिष्य यतितव्यं, एवमेव भगवदाज्ञाया विशेषाराधनेन निर्जरालाभादिति ।

ननु एवमर्थपदसम्पदुपयुक्तत्वादिविशेषणविशिष्टस्य प्रतिक्रमणकरण[स्य] किं फलं ? उच्यते–अन्योऽन्यानाबाधया यथोक्तविधिपूर्वं विधीयमानं प्रति ( ! ) प्रतिक्रमणं शारी[रि]काशेषक्लेशविनाशाय जायते, तथा ( ! ) यथोचितकाले क्रियमाणं रसाङ्गाद्यौषधमसाध्यस्यापि व्याधेर्विध्वंसाय, नान्यदा तथा । ननु यद्येवं प्रतिक्रमणकल्पतरोर्दुरन्तदुःखमोक्षलक्षणं मुख्यफलं तर्हि सततं प्रतिक्रान्तिरेव क्रियतां, किमन्येन क्रियान्तरेणानुष्ठितेन ? नैवं, अन्योऽन्यानाबाधयेति विशेषणेनैव विहितोत्तरत्वात् । अयमर्थः–प्रतिक्रान्तिक्रिया क्रियमाणा यदि यथोचितकालकरणार्हप्रतिलेखनादिक्रियान्तरं न बाध्यते तर्हि यथोक्तफला, यथाहि–भेषजमपि यथोचितकालपथ्यासेवनादिक्रियान्तराबाधकं यथोक्तरोगस्य साधकं । अयम्भावः–प्रतिक्रमणं कुर्वन्नपि यथोक्तकालं प्रतिलेखनाद्यकुर्वन् देशत एवाराधकः स्यान्न सर्वतः । सर्वत आराधकस्त्वेवं–

"पंचिंदिएहिं गुत्तो, मणवभिइतिविहकरणमाउत्तो । तवनियमसंजमम्मि, जुत्तो आराहओ होइ ॥१॥"

मनो-
वाकाय-
शुद्ध्यैव
विशिष्ट-
निर्जरा-
त्वम् ।

॥ १६ ॥

व्याख्या—इन्द्रियैः पञ्चभिर्गुप्तः, मनःप्रभृतित्रिविधकरणयत्नवान्, द्वादशभेदतपइन्द्रियनियमयुक्तः, पृथिव्यादिकाय ५ द्वीन्द्रियादिजीव ४ अजीव १० प्रेक्षाऽप्रेक्षाप्रमार्जनापरिष्ठाप[नम]नोवचनकायैः संयमः सप्तदशभेदः। अत्र संयतः सन् मोक्षस्याराधकः प्रव्रज्याया वा भवति। ]

अत्र प्रतिक्रमणमित्युक्ते त्रयं लभ्यते, क्रिया कर्त्ता कर्म च, तत्र प्रतिक्रमणमिति क्रिया, प्रतिक्रामकः कर्त्ता साध्वादिः सम्यग्दृष्टिरुपयुक्तादिविशेषणविशिष्टः। उक्तं च—"जण्णं समणो वा समणी वा सावओ वा साविया वा तच्चित्ते तम्मणे तल्लेसे तदज्झवसिए तत्तिव्वऽज्झवसाए तयट्ठोवउत्ते तदप्पियकरणे तब्भावणाभाविए, अन्नत्थ कत्थइ मणं अकुव्वमाणे एगमणे अविमणे जिणवयणधम्मरागरत्तमणे उभओ कालं आवस्सयं करेंति" इति। मिथ्यात्वकषायादिप्रतिक्रमणीयं कर्म। एतच्च प्रतिक्रमणप्रसङ्गादूचे। इति दैवसिकप्रतिक्रमणविधिरुक्तः।

इदानीं रात्रिकप्रतिक्रमणक्रमः कश्चिदुच्यते—तद्यथा—पाश्चात्यनिशायामे निद्रां परित्यज्य "इरियावहियाए अपडिक्कंताए न किंचि कप्पइ चेइयवंदणसज्झायावस्सयाइ काउं +" इति श्रीमहानिशीथे। "दिव्वकुसुम-सेहर-मुयइ दव्वाहिगारमज्झम्मि। ठवणायरियं ठविउं, पोसहसालाइ तो सीहो ॥ १ ॥ उम्मुक्कभूसणो सो, इरियाइ पुरस्सरं च मुहपत्तिं। पडिलेहिऊण तत्तो, चउव्विहं पोसहं कुणइ ॥ २ ॥" × इति विवाह-

+ अनुक्तेऽप्यत्र सामायिकाभिधाने यत्सामायिकोच्चारात्प्राग्रीर्याया: प्रतिक्रमणमुक्तेऽपि च स्वाध्यायात्प्रागप्रतिक्रमणमिति स्वाभि-निवेशविलसितमेव। × निरसितचतुर्थचरणैतद्गाथायुगेनापि सामायिके प्राग्रीर्याप्रतिक्रान्तिप्रसाधनं स्वसुहृदां प्रत्यायनमात्रमेव,

चूलिकायां। "तत्थ ढङ्करो नाम सावओ सरीरचिंतं काऊण पडिस्सयं वच्चइ, ताहे तेण दूरट्ठिएण तिन्नि निसीहियाओ कयाओ, एवं सो इरियाई ढङ्करेण सरेण करेइ" * इत्याद्यावश्यकचूर्णौ। [ पूर्वार्द्ध पत्र ४०२ ] तथा "ववहारावस्सयमहा-निसीहभगवइविवाहचूलासु। पडिक्कमणचुण्णिमाइसु, पढमं इरियाइ पडिक्कमणं ॥ १ ॥§" इत्याद्युक्तेः। "जइ गमणागमणाई, आलोइय निंदिऊण गरिहित्ता। हा! दुट्ठऽम्हेहिं कयं, मिच्छादुक्कडमिअ भणित्ता ॥ २ ॥ तह उस्सग्गेण तयणु-रूवपच्छित्तमणुचरित्ताणं। जं आयहियं चिइवं-दणाइऽणुट्ठिअ उवउत्तो ॥ ३ ॥ दव्वऽवणे पवित्ती, करेइ जह काउ वज्झतणुसुद्धिं। भावऽवणं तु कुज्जा,

साक्षात्पौषधविधेरुच्चारसामायिकनाममात्रस्याप्यनुक्तत्वाच्चेति।

* अनेनापि प्रमाणेन सामायिकोच्चारात्प्रागीर्याप्रतिक्रान्तिसिद्ध्यर्थं "आवश्यकचूर्णौ ढङ्करश्रावको विभातकाले गृहान्निसृत्य शरीरचिन्तां विधायोपाश्रये ईर्यां प्रतिक्रामन् कथितोऽस्ति, सा वेला सामायिकप्रतिक्रमणकरणस्येति ॥ ४९ ॥" [ सेन प्र. उ. ४ पत्र १०७ ] इत्यादि जल्पनमपि येन केन भक्तजनस्थिरीकरणायासमेव, न वास्तविकं, यतो गुरुवन्दननिमित्तकैव ढङ्करस्येर्याप्रतिक्रान्तिरिति 'ढङ्करेण सरेण करेइ' इत्यतः पुरोवर्त्तिना "सो [ आर्यरक्षितो ] मेहावी तं उवधारेति, सो वि तेणेव कमेणं वन्दावतो सव्वेसिं साहूणं कतं" इत्यनेन चूर्णिपाठेन मस्फुटं भवति। § गाथायामस्यां प्रागीर्याप्रसाधकत्वेन निर्दिष्टाभिधानेषु प्रायः सर्वेष्वपि शास्त्रेषु नोक्ता सामायिकोच्चारात्प्रागीर्याप्रतिक्रान्तिः, प्रत्युतावश्यकचूर्ण्युत्तरविभागे ( २९९ पृष्ठे ) सामायिकविधिं प्रतिपादयद्भिः पूर्वर्षिभिः श्रीमज्जिनदासगणिमहत्तरैः स्पष्टमुक्ता सामायिकोच्चारानन्तरमीर्याप्रतिक्रान्तिः।

तह इरियाए विमलचित्तो ॥ ४ ॥" + इत्यादियुक्तेश्च पूर्वमीर्यापथिकीं प्रतिक्रामेत् ।

तत्र च त्रिषष्ट्यधिकपञ्चशतीमितानां जीवानामेवं मिथ्यादुष्कृतं दीयते, तद्यथा–" चउदसपया १ अडयाला २, तिगऽहियतिसया ३ सयं च अडनउयं ४ । चउगइ दसगुणमिच्छा, पणसहसा छ सयतीसा य ॥ १ ॥ नेरइया सत्तविहा, पज्जत्तअपज्जत्तणेण चउदसहा । अडचत्ताईसंखा, तिरिनरदेवाण पुण एवं ॥ २ ॥ भूदग-गिवाऊऽणंता, वीसं सेसनरुविगल अट्ठे य । गब्भेयरपज्जेयर–जल १ थल २ नह ३ उर ४ भुआ ५ वीसं ॥ ३ ॥ पनरस १ तीस २ छप्पन्ना ३, कम्मा १ कम्मा २ तहंतरदीवा ३ । गब्भयपज्जअपज्जा, मुच्छअपज्जा तिसयतिन्नि ३०३ ॥ ४ ॥ भवणा परमा जंभय–वणयर दस पनर दस य सोलसगं । चरथिरजोइसदसगं, किब्बिसतिअं नव य लोगंता ॥ ५ ॥ कप्पगेविज्जऽणुत्तर–बारस नव पण पज्जत्त–अपज्जत्ता । अडनउयसयं अभिहय–वत्तियमाईहिं दसगुणिया ॥ ६ ॥" एवं च–" अभिहयपयाइदह-गुण, पणसहस्स छ सय तीसया भेआ । ते रागदोसदुगुणा, इक्कारस दो सया सट्ठा ॥ ७ ॥ मणवयकाए गुणिया, तित्तीससहस्ससत्तसयसीआ । कारणकरणाणुमई, लक्खसहस्सा तिसय चाला ॥ ८ ॥ काल-

+ एतद्गाथाचतुष्कोक्ता बाह्यशुद्धिर्मलस्थानादपक्रम्याऽनपसृत्य यदौदरिकमलमनिसृज्य शौचकरणतुल्यैव, यथा द्रव्यार्चने द्रव्यमलव्युत्सर्जनपुरस्सरमेव बाह्या तनुशुद्धिर्विधीयते तथैव भावार्चनात्मके सामायिके सामायिकोच्चारेण सावद्ययोगलक्षणभावमल-व्युत्सर्जनपूर्वकमैर्यापथिकीप्रतिक्रान्त्या भावशुद्धिर्विधातुमुचिता, सामायिकोच्चारणमन्तरेणासम्भाव्यत्वात्सावद्यमलोत्सर्गस्य ।

प्रतिक्रमण-हेतुगर्भः। ॥ १८ ॥

त्तणं गुणिया, तिलक्ख चउसट्ठसहस्सअहिया य। अरिहंतसिद्धसाहू, देवयगुरुअप्पसक्खीहिं ॥ ९ ॥
अट्ठारसलक्खाइं, चउवीससहस्स एगवीसऽहिया। इरियामिच्छादुक्कड–पमाणमेवं सुए भणियं ॥ १० ॥"

व्याख्या–सप्तनरकभवाः ७, पर्याप्तापर्याप्तभेदेन १४। इलाजलानलानिलानन्तवनस्पतयः पर्याप्तापर्याप्तसूक्ष्मबादरभेदैः २०। प्रत्येकवनस्पतयः सूक्ष्मबादरभेदाभ्यां २। द्वित्रिचतुरिन्द्रियाः पर्याप्ता अपर्याप्ताश्च ६। जलस्थलखचरा उरःपरिभुजपरिसर्पाश्च संज्ञ्यसंज्ञिपर्याप्तापर्याप्ताः २०। एवं ४८ तिर्यग्भेदाः। कर्मभुवः १५, अकर्मभुवः ३०, अन्तर्द्वीपाः ५६, एवं १०१, एषां गर्भजानां पर्याप्तापर्याप्ततया २०२, सम्मूर्च्छजत्वेन पुनः ३०३ [ मनुजभेदाः ]। भवनपति १०, व्यन्तर १६, चरस्थिरभेदज्योतिष्क १० भेदाः, स्वर्लोक १२ ग्रैवेयक ९ अनुत्तर ५ लोकान्तिक ९ किल्बिषिक ३ भरतैरावतवैताढ्यदशकस्थजृम्भक १० परमाधार्मिकाः १५, सर्वे पर्याप्तापर्याप्ताः १९८. सर्वाग्रेण ५६३ [ जीव]भेदाः। अभिहयादि १० गुणिताः ५६३०। रागद्वेषैर्गुणिताः ११२६०। योगत्रयगुणिताः ३३७८०, एवमग्रतोऽपि ज्ञेयाः। " अंडे १ पाणे २ सयणे ३, वत्थे ४ छेणे ५ अ पुप्फ ६ फल ७ विज्ञा ८। बहुफल ९ अविवत्तिजुया, य १० जंभगा दस-विहा हुंति ॥ १ ॥" एवमीर्यापथिकीं प्रतिक्रम्य साधुः, श्रावकस्त्वकृतसामायिकः सामायिकं कृत्वा क्षमाश्रमणपूर्वं "कुसुमिण–दुस्सुमिण–ओहडावणियं राइयपायच्छित्तविसोहणत्थं काउस्सग्गं करेमि?" इत्यादि भणित्वा चतुर्विंशतिस्तवचतुष्कचिन्तनरूपं शतोच्छ्वासमानं, स्त्रीसेवादिरूपकुस्वप्नोपलम्भे त्वष्टोत्तरशतोच्छ्वासमानं कायोत्सर्गं कुर्यात्। रागादिमयः कुस्वप्नः द्वेषादिमयो दुःस्वप्नः, यदुक्तं कायोत्सर्गनिर्युक्तौ स्वप्नद्वारे–" पाणिवह १ मुसावाए २,

ईर्यापथ मिथ्या-दुष्कृत-सङ्ख्या-नयनम्।

॥ १८ ॥

अदत्त ३ मेहुण ४ परिग्गहे ५ चेव । सयमेगं तु अणूणं, उसासाणं हविज्जाहि ॥ १ ॥ ' मेहुण 'त्ति भाष्यते– दिट्ठी विप्परियासे, सयमेहुणंमित्थीविप्परिआसे । ववहारेणऽट्ठसयं, अणभिस्संगस्स साहुस्स ॥ २ ॥ " स्त्रिया अनुरागतोऽवलोकनं दृष्टिविपर्यासः, स्त्रीविपर्यासो–ऽब्रह्मसेवनं । अयं च कायोत्सर्गो दुःस्वप्नजनितादिपातकशुद्ध्यर्थं तत्प्रायश्चित्तरूपो रात्रिकावश्यकात्पृथगेव सम्भाव्यते, गमनागमनादौ ईर्यापथिकीकायोत्सर्गवत् ।

इह च सर्वं श्रीदेवगुरुवन्दनपूर्वं सफलमिति चैत्यवन्दनां विधाय स्वाध्यायकायोत्सर्गादिधर्मव्यापारं विधत्ते याव-त्प्राभातिकप्रतिक्रमणवेला, तदनु चतुरादिक्षमाश्रमणैः श्रीगुर्वादीन् × वन्दित्वा क्षमाश्रमणपूर्वं " राइय पडिक्कमणे ठाउं ? " इत्यादि भणित्वा भूनिहितशिराः " सव्वस्स वि राइय० " इत्यादिसूत्रं सकलरात्रिकातीचारबीजकभूतं

× अत्र हि सेनप्रश्नोत्तरतृतीयोल्लासगतं निर्दक्ष्यमाणं प्रश्नोत्तरं विचारणीयमस्ति–" प्रतिक्रमणहेतुगर्भे रात्रिकप्रतिक्रमणविधौ रात्रिकप्रायश्चित्तकायोत्सर्गस्ततः चैत्यवन्दनं ततः स्वाध्यायः, एवं पश्चात्प्रतिक्रमणादौ चत्वारि क्षमाश्रमणान्युक्तानि सन्ति, एवं तु न क्रियते तत्किं बीजमिति प्रश्नोऽत्रोत्तरं–यतिदिनचर्यादौ स्वाध्यायादनु चत्वारि क्षमाश्रमणानि प्रोक्तानि, श्राद्धदिनकृत्यवृत्ति–वन्दारु-वृत्त्यादौ स्वाध्यायादनु प्रतिक्रमणस्थापनमुक्तं, ततस्तानि स्वाध्यायात्पूर्वं क्रियन्ते, अयं च विधिः परम्परया बाहुल्येन क्रियमाणो-ऽस्ति सामाचारीविशेषेण चोभयथाऽप्यविरुद्धमेवेति ॥ १९२ ॥ " ( उ. ३, पत्र ६८ )

अत्र विचारणीयमेतदुत–श्राद्धदिनकृत्यवृत्ति–वन्दारुवृत्त्यादावनुक्तमपि स्वाध्यायकरणादर्वाक् क्षमाश्रमणचतुष्टयस्य दानं यति-दिनचर्यादावुक्तमपि च स्वाध्यायादनु यत्तस्यादानं तत्र स्वाग्रहादन्यत्किं कारणं मन्तुं शक्यते ? ।

प्रतिक्रमण-हेतुगर्भः । ॥ १९ ॥

रात्रिक-प्रतिक्रमणे-स्वाध्या-यादनु-क्षमा० चतुष्क-दानम् । ॥ १९ ॥

भणित्वा शक्रस्तवं पठति । उक्तं च–" एवं ता देवसियं, राइयमवि एवमेव नवरि । तहिं पढमं दाउं, मिच्छामि दुक्कडं पढइ सक्कथयं ॥ १ ॥ " [ + प्राक्तनं च चैत्यवन्दनं स्वाध्यायादिधर्मकृत्यस्य प्रतिबद्धं, न तु रात्रिकावश्यकस्य, अत एवात्र एतदारम्भे मङ्गलार्थं पुनः शक्रस्तवेन संक्षेपदेववन्दनं, ] इत्यादि कारणानि यथागमसम्प्रदायादिस्वयं भाव्यानि । ततो द्रव्यतो भावतश्चोत्थाय " करेमि भंते ! सामाइय "मित्यादिसूत्रपाठपूर्वं चारित्र-दर्शन-ज्ञानाचारातिचारविशुद्ध्यर्थं कायोत्सर्गत्रयं करोति, प्रथमे कायोत्सर्गे एकं चतुर्विंशतिस्तवं चिन्तयति, द्वितीयेऽप्येकं " सयलसुंगंगोसद्दं "ति वचना-च्चिन्तयति, तृतीये तु निशाऽतिचारांश्चिन्तयति । इह च पूर्वोक्तयुक्त्या चारित्राचारस्य ज्ञानाद्याचारेभ्यो वैशिष्ट्येऽपि यदेकस्यैव चतुर्विंशतिस्तवस्य चिन्तनं तद्रात्रौ प्रायोऽल्पव्यापारत्वेन चारित्राचारातिचाराणां स्वल्पत्वादिना सम्भाव्यते ।

ततः कायोत्सर्गं पारयित्वा सिद्धस्तवं पठित्वा सण्डासकप्रमार्जनपूर्वमुपविशति, उक्तं च–" उट्ठिअ करेइ विहिणा, उस्सग्गं चिंतए अ उज्जोयं । बीयं दंसणसुद्धीएँ, चिंतए तत्थ वि तमेव ॥ १ ॥ तइए निसाइयारं, जहकमं चिंतिऊण पारेइ । सिद्धत्थयं पढित्ता, पमज्ज संडासमुवविसइ ॥ २ ॥ "

ननु प्राभातिकप्रतिक्रमणेऽपि प्रादोषिकप्रतिक्रमणवत्प्रथमे चारित्राचारातिचारविशुद्धिकायोत्सर्गे निशातिचारचिन्तनं कस्मान्न क्रियते ?, उच्यते–" निद्दाऽभिभूया न संभरंति सुट्ठु अइयारं, मा य अंधयारे वंदंताणं अन्नुन्नघट्टणं

+ एतच्चिन्हान्तर्गतपाठस्थाने " इह च शक्रस्तवपाठेन संक्षेपदेववन्दनं पूर्वकृतचैत्यवन्दनत्वेऽपि श्रीदेवभक्तिः सर्वत्र कार्येति " इति पाठान्तरं प. पुस्तके ।

अंधयारे वा अदंसणओ मंदसद्धा न सम्मं वंदणगं देंतित्ति काउं पच्छा इह तइए निसाइयारं चिंतंति।" उक्तं च–"तत्थ पढमो चरित्ते, दंसणसुद्धीइ बीयओ होइ। सुअनाणस्स य तइओ, नवरं चिंतेइ तत्थ इमं ॥ १ ॥ तइए निसाइआर" मित्यादि। ततः पूर्ववन्मुखवस्त्रिकादिप्रतिलेखनापूर्वं वन्दनकदानादिविधिं विधत्ते तावद्यावत्प्रतिक्रमणसूत्रानन्तरः कायोत्सर्गः। उक्तं च–" पुव्वं व पुत्तिपेहण–वंदणमालोअसुत्तपढणं च। वंदण–खामण–वंदण, गाहातिगपढणमुस्सग्गो ॥ २ ॥" पूर्वं चारित्राद्याचाराणां प्रत्येकं शुद्धये पृथक् २ कायोत्सर्गाणां कृतत्वेन साम्प्रतं तेषां समुदितानामतिचारान् प्रतिक्रमणेनाशुद्धान् शोधयितुमयं कायोत्सर्गः समाव्यते।

अत्र च कायोत्सर्गे श्रीवीरकृतं षाण्मासिकं तपश्चिन्तयति–श्रीवर्द्धमानतीर्थे वर्त्तमानस्त्वं हे जीव! वर्द्धमानकृतं षाण्मासिकं तपः कर्तुं शक्नोषि न वेत्यादितपोविधिश्च श्रीआगमोक्तो, यथा–प्रथमतीर्थङ्करस्य तीर्थे वार्षिकं तपो भवति, मध्यमतीर्थङ्कराणां तीर्थे अष्टमासिकं तपः, श्रीवर्द्धमानतीर्थे तु षण्मासिकं तपः। यदाह–" × संवच्छरमुसभजिणो, + छम्मासा * वद्ध-

× संवत्सरं यावद्भिक्षाऽलाभकारणकर्मबन्धो वाच्यः। + ननु षाण्मासिके तपसि एकैकदिनहान्या न्यूनीकरणे कुत एकोनत्रिंशद्दिनानि यावदेव न्यूनीकरणं? न त्रिंशद्दिनानि यावत्, त्रिंशतैव दिनैर्मास इति व्यवहारात्, इति चेन्न, अभिप्रायापरिज्ञानात्, यतस्त्रिंशद्दिनानि यावन्न्यूनीकरणेऽपि मासेनैव न्यूनता, सा चैकोनत्रिंशद्दिनानि यावन्न्यूनीकरणपूर्वं 'पञ्चमासिकतपः करिष्यसी'ति प्रश्नवचसा सिद्धा, यतः 'पञ्चमासिकतपः करिष्यसी'ति प्रश्नेऽपि 'त्रिंशद्दिनैर्न्यूनं षाण्मासिकं तपः करिष्यसी'त्ययमेवार्थः, यदि च त्रिंशद्दिनानि यावन्न्यूनीकृत्य पुनः 'पञ्चमासिकं तपः करिष्यसी' त्युच्येत तदा पुनरुक्तिप्रसक्तिः, तेन युक्तः एकोनत्रिंशद्दिनानि यावन्न्यूनी-

प्रतिक्रमण हेतुगर्भः। ॥ २० ॥

माणजिणचंदो। इअ चिंतिऊण निरसणा, अइज एओचमाणेणं ॥ १ ॥ ततश्च क्रमाद्धान्या षाण्मासिकं तपश्चिन्तयन् यत्कर्तुं शक्नोति तन्मनसि निधाय कायोत्सर्गं पारयित्वा मुखवस्त्रिकादिप्रतिलेखनापूर्वं वन्दनकं दत्वा मनश्चिन्तितप्रत्याख्यानं विधत्ते। उक्तं च-"तत्थ य चिंतइ संजम-जोगाण न जेण होइ मे हाणी। तं पडिवज्जामि तवं, छम्मासा ता न काउमलं ॥ १ ॥ एगाइइगुणतीसूणि-यं पि न सहो न पंचमासमवि। एवं चउ-ति-दुमासं, न समत्थो एगमासं पि ॥ २ ॥ जा तंपि तेरसूणं, चउतीसइमाइ तो दुहाणीए। जाव चउत्थं तो, अंबिलाइ जा

कृत्य पृथक् व्यक्त्यार्थं 'पञ्चमासिकतपः करिष्यसी'ति प्रश्नः। एवं शेषमासेष्वपि भाव्यम्। [ एतेन प्रतिमासमेकैकदिनहानिरेव प्रश्नोत्तरक्रमेण चिन्तनीया, न पुनः पञ्चादिद्विपर्यन्तेषु मासेष्वेकद्वित्रिचतुःपञ्चदिनानां हानिर्युगपदेवेति ध्वन्यते स्पष्टम्। सम्पादकः ]

नन्वेवं पञ्चसु मासेषु त्रिंशद्दिनपूरणे एकमासिकतपसि त्रिंशद्दिनपूरणं, यतस्तत्र एकैक[दिन]हानिस्त्रयोदशदिनानि यावत् चउवीस-[! चतुस्त्रिंशत्]मतपसि च षोडश, एवं मिलितान्येकोनत्रिंशद्दिनान्येव इति चेत्सत्यं, किन्तु प्रतिप्रश्नमेकैकदिनहानिरेवं 'चतुर्दश-दिनन्यूनं कर्तुं शक्नोषी'ति प्रश्नावसरे च 'चतुस्त्रिंशत्तमं कर्तुं शक्नोषी'ति प्रश्नः, ततः 'चतुस्त्रिंशत्तमं कर्तुं शक्नोऽसी'त्यस्य कोऽर्थः ? 'चतुर्दशदिनन्यूनमेकमासं कर्तुं शक्नोऽसी'त्येवार्थः, अन्यथा 'त्रयोदशदिनन्यूनं मासं कर्तुं शक्नोषी'ति प्रश्नस्यार्थाभेदात् पौनरुक्त्यापत्तिः, ततश्च पूर्वं एकैकदिनहान्या दिनत्रयोदशकं, [ ततः ] चतुस्त्रिंशत्तमं कर्तुं शक्नोषीति २० (!) इति प्रज्ञापन-चतुर्दशदिनं, तदनन्तरं साक्षात्तत्पोडशदिनसीकने मासः। एवमेकमासिकेऽपि त्रिंशद्दिनपूरणम्। इति षाण्मासिकतपः सम्पूर्णम्। [ टिप्पणमेतच्चेतापि भाव्यविदुषा पण्डितप्रवर(श्रावक)मत्कचित्कोपीनमपरिक्षते ]

रात्रिक-प्रतिक्रमणे-षाण्मासि-कतपश्चि-न्तनविधिः॥

॥ २० ॥

पोरिसि नमो वा ॥ ३ ॥ जं सक्कइ तं छिप्पए, धरित्तु पारित्तु पेहए पुत्तिं । दाउं वंदणमसढो, तं चिय पच्चक्खए + विहिणा ॥ ४ ॥ "

तदनु च " इच्छामो अणुसट्ठिं " × ति भणित्वोपविश्य स्तुतित्रयादिपाठपूर्वं चैत्यानि वन्दते । यत उक्तं– " इच्छामो अणुसट्ठिं ति, भणिअ उवविसिअ पढइ तिन्नि थुई । मिउसद्देणं सक्क-त्थयं इओ चेइए वंदे ॥ १ ॥ " उभयोरप्यावश्यकयोराद्यन्तेषु मङ्गलार्थं चैत्यवन्दनस्य विहितत्वेऽपि यदहर्मुखे प्रदोषे च विस्तरतो देववन्दनं तद्विशेषमाङ्गल्यार्थं कालवेलाप्रतिबद्धत्वेन * च सम्भाव्यते, अन्यथा वा यथागमं कारणमभ्यूह्यम् ।

इदं च प्रतिक्रमणं मन्दशब्देनैव कुर्यात्, रात्रावुच्चैःस्वरेण शब्द-कासित-हुङ्कार-खुक्कारादेरपि निषेधात्, अन्यथा तस्करोल जागरितैर्गृहगोधादिहिंस्रजीवैर्मक्षिकोपद्रवाद्यारम्भः प्रातिवेश्मिकैर्वा स्वस्वारम्भः प्रवर्त्येत, तथा च परम्परया निरर्थकमनेके दोषाः प्रवर्त्तिता भवेयुः ।

एवं रात्रिकप्रतिक्रमणं विधाय साधुः कृतपौषधः श्राद्धश्च क्षमाश्रमणद्वयेन " भगवन् ! बहुवेलं संदिसावेमि–

+ मनश्चिन्तितं प्रत्याख्यानं प्रत्याख्यातव्यमेवात्र, अन्यथा क्षुदुर्निवारः प्रत्याख्याननामषष्ठावश्यकाभावप्रसङ्गः, अतो मन्यन्ते येऽत्र प्रत्याख्यानधारणं ते शास्त्रगुर्वाज्ञोत्तीर्णवादिन एव ।

× एतेन " सामाइय चउवीसत्थओ० " इत्यादिभणने स्फुटमेव शास्त्रगुर्वाज्ञोत्तीर्णत्वम् ।

* कालवेलाप्रतिबद्धत्वाद्देववन्दनस्य व्यतीतायामप्राप्तायामपि च प्रातस्सायं चापि यदवश्यं देववन्दनं तन्मतामहविलसितमेव ।

बहुवेलं करेमि " इति भणति, एतस्यायमर्थः—सर्वकार्याणि श्रीगुरुप्रश्नपूर्वकं कार्याणि +, ततश्च दिवसमध्ये लघुलघुकार्येषु पुनः पुनः प्रश्नः कर्तुं दुःशकः, तत एतत् क्षमाश्रमणद्वयेन तत्तल्लघुलघुकार्यकरणविषये श्रीगुरूणामनुमतिं मार्गयति, बहुवेलासम्भवानि कार्याण्यपि बहुवेलेत्युच्यन्ते, सुधीभिस्त्वन्यथापि यथागमं विचार्य, उक्तं च—" किच्चाकिच्चं गुरवो, वयंति विणयपडिवत्तिहेउं च । ऊसासाइयमुत्तुं, तयणापुच्छाइ पडिसिद्धं ॥ १ ॥ " ततश्चतुर्भिः क्षमाश्रमणैः श्रीगुर्वादीन् वन्दते, श्राद्धस्तु " अड्ढाइज्जेसु " इत्यादि च पठति, ततः प्रतिलेखनां विधत्ते, तद्विधिस्तु प्रतीतः । अत्रापि प्रतिक्रमणे पञ्चविधाचारविशुद्धिविधिः पूर्ववद्भाव्यः । इति रात्रिकप्रतिक्रमणविधिः ।

अथ पाक्षिकं चतुर्दशीदिने, ननु दैवसिकरात्रिकाभ्यां शुद्धौ पाक्षिकादि किमर्थं ? उच्यते—साधवः सूक्ष्मबादरातिचारजातस्य विशोधनार्थं सदा दिवसनिशावसानेषु प्रतिक्रमणं विदधाना अपि पक्षचतुर्माससंवत्सरान्तेषु × विशेषेण प्रतिक्रमणं कुर्वन्ति, उत्तरकरणविधानार्थं, तथाहि—यथा कश्चिच्चैलादिभिः कृतवपुःसंस्कारोऽपि धूपविलेपनभूषणादिभिरुत्तरकरणं विधत्ते

+ एतेनायुक्तं सामायिकादौ ' बेसणं संदिसाउं ' इत्याद्यादेशमार्गणात्प्रागेवासने उपविशनं श्राद्धानां, चेद्युक्तमेतस्यात्तदा ' सामायिक संदिसाउं ' इत्यादेशमार्गणात्प्राक्सामायिकोच्चारणे स्वाध्यायादेशात्प्राक्स्वाध्यायकरणेऽपि च किमयुक्तं स्यात् ? ।

× नहि चतुर्दश्यादिक्षये त्रयोदशी पक्षान्तत्वेन व्यपदेष्टुं शक्यते केनापि, चेत्पञ्चदशदिनावसानभावित्वात्त्रयोदशी पक्षान्तत्वेन व्यपदेष्टुमुचितं स्यात्तर्हि किमनुचितं सर्वासामपि प्रतिपदादितिथीनां पक्षान्तत्वव्यपदेशनं ? सर्वासामपि तासां पञ्चदशदिनावसान एव भवनात् ।

तथा श्रावकोऽपि शुद्धिविशेषं कुर्वते इति। किञ्च–"जह गेहं पइदिवसं, विसोहियं तहवि पक्खसंधीसुं। सोहिज्जइ सविसेसं, एवं इहयं पि नायव्वं ॥ १ ॥" तथा नित्यप्रतिक्रमणे कश्चिदतिचारोऽपि विस्मृतः स्यात् स्मृतो वा भयादिना गुरुसमक्षं नालोचितः स्यात् अनाभोगप्रमादाद्यसम्यक् प्रतिक्रान्तो वा स्यादतः पाक्षिकादिषु ते प्रतिक्राम्यन्ते।

तत्र च पाक्षिके पूर्वं दैवसिकप्रतिक्रमणं प्रतिक्रमणसूत्रान्तं विधत्ते, आह च–"अह पक्खियं चउद्दसि–दिणम्मि पुव्वं व तत्थ देवसियं। सुत्तंतं पडिक्कमिउं, ता सम्ममिमं कमं कुणइ ॥ १ ॥" "इच्छामि खमासमणो! × × मत्थएण वंदामि, देवसियं आलोइयं पडिक्क[तं]ता (?) इच्छाकारेण संदिसह भगवन्! पोत्ती मुहपत्ती पडिलेहुं?" इत्युक्त्वा तां प्रतिलिख्य वन्दनं दत्त्वा सम्बुद्धान् श्रीगुर्वादीन् क्षमयितुं क्षमाप्रधानं च सर्वमप्यनुष्ठानं सफलमिति ज्ञापयितुं "अब्भुट्ठिओमि संबुद्धाखामणेणं अब्भिंतर पक्खियं खामेउं" + इति भणित्वा

+ इतः पुरस्तादावश्यकसूत्रे "एगस्स पक्खस्स पन्नरसण्हं दिवसाणं पन्नरसण्हं राईणं" इति जल्पनोल्लेख उपलभ्यते, एतदनुसारेणैव यथा चतुर्मासात्मके चातुर्मासिके "चउण्हं मासाणं अट्ठण्हं पक्खाणं १२० राइंदियाणं" इत्येवं तथा द्वादशमासात्मके सांवत्सरिकेऽपि "बारसण्हं मासाणं चोवीसण्हं पक्खाणं ३६० राइंदियाणं" इत्येवं, कल्पना क्रियते सर्वैरपि, तथैव पञ्चमासात्मके चातुर्मासिके "पंचण्हं मासाणं दसण्हं पक्खाणं १५० राइंदियाणं" इत्येवं तथा त्रयोदशमासात्मके सांवत्सरिके "तेरसण्हं मासाणं छव्वीसण्हं पक्खाणं ३९० राइंदियाणं" इत्येवं कल्पनाकरणं नायुक्तं, यतः सर्वेष्वपि चातुर्मासिकेषु "चउण्हं मासाणं०" इत्यादि तथा सांवत्सरिकेषु "बारसण्हं मासाणं०" इत्याद्येव जल्पितव्यमिति नोक्तं कस्मिन्नपि सर्वमान्यप्रामाणिकेषु शास्त्रेषु।

प्रतिक्रमण-हेतुगर्भः । ॥ २२ ॥

श्रीगुर्वादीन् क्षामयति त्रीन् पञ्च वा यदि द्वौ शेषौ, उक्तं च पाक्षिकसूत्रवृत्तौ सम्बुद्धाक्षामणकप्रस्तावे-" एवं जहन्नेणं तिन्नि पंच वा, चाउम्मासिय संवच्छरिए सत्त, उक्कोसेणं तिसुवि ठाणेसु सव्वे खामिज्जंति त्ति " पाक्षिकादि-विधौ क्षाम-णाविधि ।

तत उत्थाय " इच्छाकारेण संदिसह भगवन् ! पक्खियं आलोएमि ?, इच्छं आलोएमि जो मे पक्खिओ " इत्यादिसूत्रं भणित्वा संक्षेपेण विस्तरेण वा पाक्षिकानतीचारानालोचयति, [ततः] " सव्वस्स वि पक्खिय " इत्यादि भणित्वा उपवासादिरूपं प्रायश्चित्तं प्रतिपद्यते । ततो वन्दनकदानपुरस्सरं प्रत्येकक्षामणकानि विधातुं गुरुरन्यो वा ज्येष्ठः पूर्वमुत्थायोर्ध्वस्थित एव कनिष्ठं क्षमयति, यथा-' अमुक तपोधने 'त्यादि, अत्र चोक्तं पाक्षिकसूत्रचूर्णौ-" गुरू अन्नो वा जो जेट्ठो सो पढममुट्ठेऊण उद्धट्ठिओ चेव कणिट्ठं भणइ, जथा-' अमुक तपोधने ' त्यादि । सीसो पुच्छइ-किं गुरू उट्ठित्ता खामेइ ? उच्यते-जइजाणावणत्थं, जहा एस महप्पा मोत्तुमहंकारं दव्वओ वि भावओ वि अब्भुट्ठिउं खामेइत्ति । किंच-जे गुरुसमीवाओ जवाइएहिं उत्तमतरा, मा ते चिंतेज्जा-' एस नीअतरो अम्हे उत्तम ' त्ति काउं पणयसिरो खामेइत्ति, एवं सेसावि अहारायणियाए खामंति जाव दुच-रिमो चरिमं 'ति । ततो वन्दनकदानपूर्वं " देवसिअं आलोइयपडिक्कं[तं]ता (!) इच्छाकारेण संदिसह भगवन् ! पक्खियं पडिक्कमावेह, इच्छं " इति भणित्वा " करेमि भंते ! सामाइयं " इत्यादिसूत्रद्वयपाठपूर्वकं क्षमाश्रमणं दत्वा कायोत्सर्गस्थितः पाक्षिकसूत्रं शृणोति, + गुरुर्गुरुसन्दिष्टो वा साधुः सावधानमना व्यक्ताक्षरं पाक्षिकसूत्रं कथयति । ॥ २२ ॥

+ नोक्तमत्र ' पक्खियसुत्तकड्ढे ' इत्यादेस्समार्गं, यदि च " गुरुर्गुरुसन्दिष्टो वा " इत्यनेन वाक्येन स्वीक्रियते चेत्तर्हि न

उक्तं च-" मुहपत्ती वंदणयं, संबुद्धाखामणं तहा लोए। वंदणपत्तेयखा-मणाणि वंदणयसुत्तं च ॥ १ ॥ "

पाक्षिकसूत्रानन्तरं " सुअदेवया भगवई " इति स्तुतिं भणित्वोपविश्य पूर्वविधिना पाक्षिकप्रतिक्रमणसूत्रं पठति। उत्थाय तच्छेषं कथयित्वा च " करेमि भंते! सामाइय "मित्यादिसूत्रत्रयं पठित्वा प्रतिक्रमणेनाशुद्धानामतीचाराणां विशुद्ध्यर्थं द्वादशचतुर्विंशतिस्तवचिन्तनरूपं कायोत्सर्गं कुर्यात्। ततो मुखवस्त्रिकाप्रतिलेखनपूर्वं वन्दनकं दत्त्वा क्षामणकपञ्चकं कुर्यात्।

तत्र च प्रथमं-" इच्छाकारेण संदिसह भगवन्! अब्भुट्ठिओमि समाप्तखामणेणं अब्भिंतर पक्खियं खामेउ "मित्यादि भणित्वा क्षामणकं विधत्ते। ननु पूर्वमेव सामान्यतो विशेषतश्च पाक्षिकापराधक्षामणकं कृतं तर्हि किं पुनरपि इदानीं पाक्षिकं क्षामयते? उच्यते-कायोत्सर्गे स्थितानां शुभैकाग्रभावमुपगतानां किञ्चिदपराधपदं यदस्मृतं मनेरुस्य क्षामणानिमित्तं पुनरपि क्षामणकं कुर्मः, अथवा सर्वथेह पाक्षिकप्रतिक्रमणपरिसमाप्तिस्ततः प्राच्यक्षामणकानन्तरं किञ्चिदप्रतीतिकं वितथक्रियाव्यतिकरादिना समुत्पन्नं तदिह क्षाम्यते, अथवा विधिरेवायं कर्मक्षयहेतुर्भगवता तृतीयवैद्यौषधप्रयोगसदृशो दर्शितः, कर्त्तव्यमेवात्रापि क्षामणकं, न कोऽपि पर्यनुयोगः कार्यः, आज्ञैवेह भागवती प्रमाणम्।

ततश्चतुर्भिः क्षमाश्रमणैः सामाचारीयथोक्तविधिना चत्वारि पाक्षिकक्षामणकानि करोति। उक्तं च-" सुत्तं अब्भुट्ठाणं, उस्सग्गो पुत्ति वंदणं तह य। पज्जंतिअखामणयं, तह चउरो छोभवंदणया ॥ २ ॥ तत्र च यथा राजानं पुष्पमाणवका अतिक्रान्ते माङ्गल्यकार्ये बहुमन्यन्ते, यदुत-अखण्डितबलस्य ते सुष्ठुकालो गतोऽन्योऽप्येवमेवोपस्थितः, केवलं ' कइट्ठं ' इत्येक एव, किन्तु ' संदिसाउं-कइट्ठं ' इत्येवमादेशद्वयमार्गणमेव युक्तियुक्तम्।

प्रतिक्रमणहेतुगर्भः ॥

॥ २३ ॥

एवं पाक्षिकविनयोपचारं–" इच्छामि खमासमणो ! पियं च मे " इत्यादि प्रथमक्षामणकसूत्रेण तथास्थित एव साधुराचार्यस्य करोति, ततो द्वितीये क्षामणके चैत्यसाधुवन्दनं निवेदयितुकाम " इच्छामि खमासमणो ! पुव्विं " इत्यादि भणति, तदनु तृतीये आत्मानं गुरोर्निवेदयितुं–" इच्छामि खमासमणो ! अब्भुट्ठिओहं तुब्भण्हं " मित्यादि भणति, चतुर्थे तु यच्छिक्षां ग्राहितस्तमनुग्रहं बहुमन्यमान–" इच्छामि खमासमणो ! अहमपुव्वाइं " इत्याद्याह । एतेषां चतुर्णां पाक्षिकक्षामणकानां प्रत्येकं प्रान्ते " तुब्भेहिं समं १, अहमवि वंदामि चेइयाइं २, आयरियसंतियं ३, नित्थारगपारगा होह " त्ति ४ श्रीगुरूक्तो शिष्य " इच्छं २ " इति भणित्वा सर्वप्रान्ते " इच्छामो अणुसट्ठिं " इति भणति । ततो वन्दनक–क्षामणक–वन्दनक–गाथात्रिकादिपाठक्रमेण दैवसिकप्रतिक्रमणं कुर्यात् । श्रुतदेवतायाः पाक्षिकसूत्रप्रान्ते स्मृतत्वेन तद्दिने तत्कायोत्सर्गस्थाने भवनदेवताकायोत्सर्गः +, क्षेत्रदेवतायाः प्रत्यहं स्मृतौ भवनस्य क्षेत्रान्तर्गतत्वेन तत्त्वतो भवनदेव्या अपि स्मृतिः कृतैव, तथापि पर्वदिने तस्या अपि बहुमानार्हत्वात्तत्कायोत्सर्गः साक्षात् क्रियते । स्तवस्थाने अजितशान्तिस्तवपाठश्च, उक्तं च–" पुव्वविहिणेव सव्वं, देवसियं वंदणाइ तो कुणइ । सिज्जसुरीउस्सग्गो, × भेओ संतिथयपढणे य ॥ १ ॥ "

+ यद्यपि पाक्षिकादिषु तत्सूत्रप्रान्ते श्रुतदेवतायाः स्मृतिर्विहिता अतस्तत्कायोत्सर्गाकरणं कथञ्चिन्मन्यते परं विहारदिनेषु मासास्यावत्तत्कायोत्सर्गाकरणे किं कारणं कस्मिंश्चानुष्ठाने तस्यान्तर्धानं विधातुं शक्यत इति विमर्षणीयं धीधनैः । × गाथायामप्यस्यां शय्यासुर्याः कायोत्सर्गकरणलक्षणा विशेषतैव दर्शिता, न तु श्रुतदेवतायाः स्थाने तस्य करणीयत्वम् ।

पाक्षिकादिविधौ-शय्यासुर्याः कायोत्सर्गहेतुः ।

॥ २३ ॥

अत्रापि पाक्षिकप्रतिक्रमणे पंचविधाचारविशुद्धिस्तत्सूत्रानुसारेण स्वयमभ्यूह्या, सा चैवं सम्भाव्यते–ज्ञानादिगुणवत्प्रतिपत्तिरूपत्वाद्वन्दनकानि सम्बुद्धक्षामणकानि च ज्ञानाचारस्य, १२ लोगस्सकायोत्सर्गानन्तरं प्रकटचतुर्विंशतिस्तवचिन्तनेन दर्शनाचारस्य, अतिचारालोचन-प्रत्येकक्षामणक-पाक्षिकसूत्रकथन–समाप्तिपाक्षिकक्षामणकादिभिश्चारित्राचारस्य, चतुर्थतपःप्रतिपत्ति–१२ लोगस्सकायोत्सर्गादिभिः बाह्याभ्यन्तरतपआचारस्य, सर्वैरप्येतैः सम्यगाराधितैर्वीर्याचारस्य च शुद्धिः क्रियते। एतदनुसारेण चातुर्मासिक–सांवत्सरप्रतिक्रमणयोरपि सम्भाव्यम्। यत्तु ज्ञानाद्याचारसूत्राणां व्यतिक्रमेण पाठस्तत्र तत्तद्गच्छसामाचार्यादिप्रमाणं सम्भाव्यते, इति पाक्षिकप्रतिक्रमणविधिः।

चातुर्मासिकसांवत्सरिकप्रतिक्रमणयोरपि क्रम एष एव, नवरं–नाम्नि विशेषः, कायोत्सर्गे च चातुर्मासिकप्रतिक्रमणे चतुर्विंशतिस्तवविंशतिचिन्तनं, सांवत्सरिप्रतिक्रमणे च चत्वारिंशच्चतुर्विंशतिस्तवास्तदन्ते एको नमस्कारश्च चिन्त्यते। क्षामणकं च पाक्षिकचातुर्मासिकयोः पञ्चानां सांवत्सरिके च सप्तानां श्रीगुर्वादीनां, यदि द्वौ शेषौ तिष्ठतः। उक्तं च–एवं चिय चउमासे, वरिसे अ जहक्कमं विही नेओ। पक्ख चउमास वरिसेसु, नवरि नामम्मि नाणत्तं ॥ १ ॥ तह उस्सग्गो उज्जोअ–बारस वीसा समंगला चत्ता। संबुद्धखामणं ति–पण–सत्तसाहूण जह संखं ॥ २ ॥"
[ × एवं लिखिता प्रतिक्रमणानां सम्प्रतिक्रियमाणा सामाचारी, चूर्णिकारलिखिता तु सामाचारी क्वचित्कश्चिदन्यथाप्युपलभ्यते, न च तथोपलभ्य सम्मोहः कर्त्तव्यो, विचित्रत्वात्सामाचारीणां, ] इति चातुर्मासिक–सांवत्सरिकप्रति-

× नास्त्येतच्चिह्नान्तःस्थः पाठः प. पुस्तके।

प्रतिक्रमण-हेतुगर्भः । ॥ २४ ॥

क्रमणयोः क्रमविधिः सङ्क्षेपत उक्तः ।

प्रतिक्रमण-शब्दार्थः ।

अथ प्रतिक्रमणमिति कः शब्दार्थः ? [ उच्यते- ] प्रतीत्ययमुपसर्गः प्रतीपाद्यर्थे वर्त्तते । " क्रमू-पादविक्षेपे " अस्यानट्-प्रत्ययान्तस्य प्रतीपं प्रतिकूलं वा क्रमणं प्रतिक्रमणमिति भवति । अयमाशयः-शुभयोगेभ्योऽशुभयोगान्तरं क्रान्तस्य शुभेष्वेव प्रतीपं प्रतिकूलं वा क्रमणं प्रतिक्रमणं, उक्तं च-" स्वस्थानाद्यत्परस्थानं, प्रमादस्य वशाद्गतः । तत्रैव क्रमणं भूयः, प्रतिक्रमणमुच्यते ॥ १ ॥ क्षायोपशमिकाद्भावा-दौदयिकस्य वशाद्गतः । तत्रापि च स एवार्थः, प्रतिकूलगमात्स्मृतः ॥ २ ॥ " प्रतिप्रति क्रमणं वा प्रतिक्रमणं शुभयोगेषु, तं तं शुभयोगं प्रतिवर्त्तनमित्यर्थः । उक्तं च-" प्रतिप्रतिवर्त्तनं वा, शुभेषु योगेषु मोक्षफलदेषु । निःशल्यस्य यतेर्य-त्तद्वा ज्ञेयं प्रतिक्रमणम् ॥ १ ॥ "

इह च यथा करणात्कर्मकर्त्रोः सिद्धिस्तद्व्यतिरेकेण करणत्वानुपपत्तेः, एवं प्रतिक्रमणादपि प्रतिक्रमक-प्रतिक्रान्तव्यसिद्धिः, इत्यतस्त्रितयमभिधीयते, तत्र प्रतिक्रमणमिति निरूपितशब्दार्थं प्रतिक्रामतीति प्रतिक्रमकः कर्त्ता, प्रतिक्रान्तव्यं च कर्माशुभयोगलक्षणं, अतीते वर्त्तमाने एष्ये च काले । ननु प्रतिक्रमणमतीतविषयं, यत उक्तं-" अईयं पडिक्कमामि पडुप्पन्नं संवरेमि अणागयं पच्चक्खामि " त्ति, तत्कथमिह कालत्रयविषयं प्रतिक्रमणं ? उच्यते-प्रतिक्रमणशब्दो ह्यत्राशुभयोगनिवृत्तिमात्रार्थः सामान्यः शब्दः परिगृह्यते, तथा च सत्यतीतविषयं प्रतिक्रमणं निन्दाद्वारेणाशुभयोगनिवृत्तिरेवेति, प्रत्युत्पन्नविषयमपि संवरणद्वारेणाशुभयोगनिवृत्तिरेव, अनागतविषयमपि प्रत्याख्यानद्वारेणाशुभयोगनिवृत्तिरेव, उक्तं च- ॥ २५ ॥

"पडिकमणं पडिकमओ, पडिकमियव्वं च आणुपुव्वीए। तीए पच्चुप्पन्ने, अणागए चेव कालम्मि ॥ १ ॥"

× साम्प्रतं प्रतिक्रमकस्वरूपं, त[य]थोक्तं तत्त्वभेदपर्यायैर्व्याख्येति प्रतिक्रमणतत्त्वमुक्तं; सम्प्रति तद्भेदास्ते च दैवसिकादयः, आह च—" पडिकमणं देसियं, राइयं च इत्तरियमावकहियं च। पक्खिय चाउम्मासिय–संवच्छर उत्तमट्ठे य ॥ १ ॥" इत्वरं दैवसिकप्रतिक्रमणादि, यावत्कथिकं महाव्रतादिरूपम्। [ननु] दैवसिकेनैव शुद्धौ पाक्षिकादि किमर्थं ? उच्यते–जह गेहं पइदियहं, सोहियं तहवि पक्खसंधीसु। सोहिज्जइ सविसेसं, एवं इहयं पि नायव्वं ॥१॥"

सम्प्रति प्रतिक्रमणपर्यायास्ते चामी अष्टौ–" पडिकमणं १ पडिअरणा २, परिहरणा ३ वारणा ४ नियत्ती ५ य। निंदा ६ गरिहा ७ सोही ८, पडिकमणं अट्ठहा होइ ॥ १ ॥" तत्र च यथाक्रममष्टौ दृष्टान्तास्ते चामी— अद्धाणे १ पासाए २, दुद्धकाय ३ विसभोयण ४ तलाए ५। दोकन्नाओ ६ पइमा–रिया य ७ वत्थे अ अगए य ८ ॥ २ ॥" तत्र द्रव्यप्रतिक्रमणमाश्रित्याध्वनो दृष्टान्तो यथा—

पुरे क्वापि नृपः कोऽपि, सौधं कर्तुमना बहिः। सूत्रमास्फोटयन्मध्ये, दिने न्यास्थच रक्षकान् ॥ १ ॥ ऊचे च यदि कोऽप्यत्र, प्रविशेन्मार्य एव सः। अपसर्पेत पदैस्तैरेव मोच्यः पुमान् स तु ॥ २ ॥ व्याक्षिप्तानां च तेषां द्वौ, ग्राम्यौ

× आनुपूर्व्याऽतीते प्रत्युत्पन्ने–वर्तमाने[ऽना]गते (?) काले प्रतिक्रमणादि योज्यं, आह–प्रतिक्रमणमतीतविषयं " अईयं पडिक्कमामि " इति वचनात् कथमिह कालत्रये ? उच्यते–प्रतिक्रमणशब्दोऽत्राशुभयोगनिवृत्तिमात्रार्थो गृह्यते। प्रतिक्रमकस्वरूपमाह– इति टिप्पणं सोमपुरीयमतौ

प्रतिक्रमण-हेतुगर्भः ॥ ॥ २५ ॥

प्राविशतां नरौ । रक्षकैर्दूरतैर्दृष्टा–वुक्तौ तैः कम्पितासिभिः ॥ ३ ॥ अरे !!! प्रविष्टौ ? किमिह, धृष्ट एकोऽवदत्तयोः । दोषः कोऽत्रेति निस्त्रिंशै–र्नश्यंस्तत्र हतः स तैः ॥ ४ ॥ भीतो द्वितीयस्तेष्वेव, पदेष्वस्थात्प्रमाण्य तान् । अजानन् प्राविशं मा मां, हतस्वादेशकारिणम् ॥ ५ ॥ उक्तस्तैर्यदेतैरेव, पदैस्त्वमत्रसर्पसि । तन्मुक्तिस्ते स भीतोऽथ, तथाऽकार्षीदमोचि तैः ॥ ६ ॥ भोगभागी स सञ्जज्ञे, नो भागी चापरोऽभवत् । इयं द्रव्यप्रतिक्रान्ति–र्भावे चोपनयः पुनः ॥ ७ ॥ राजा तीर्थकरोऽध्वा च, संयमो रक्ष्य इत्यवक् । ग्राम्येणेव व्यतिक्रान्तः, स एकेन कुसाधुना ॥ ८ ॥ स हतो रक्षकै राग–द्वेषाद्यैः सुचिरं भवे । लप्स्यते बहूनि[?बहुभि]र्जन्म–मरणानि पुनः पुनः ॥ ९ ॥ यस्तु प्रमाददोषेण, जात्वतिक्रान्तसंयमः । प्रतिक्रामति संसार–भीरुस्तैरेव दण्डकैः ॥ १० ॥ स निर्वाणसुखाभागी, जायते मुनिपुङ्गवः । असौ प्रतिक्रमणायां, दृष्टान्तो दर्शितोऽधुना ॥ ११ ॥ १ ॥

प्रतिचरणायां प्रासाद-दृष्टान्तः ।

२–अथ प्रतिचरणा, एतदर्थश्चायं–‘ प्रति ’ प्रति तेषु तेषु भावेषु ‘ चरणं ’ गमनं तेन तेनासेवनाप्रकारेण इति प्रतिचरणा, सा द्विविधा–प्रशस्ताऽप्रशस्ता च, अप्रशस्ता मिथ्यात्वाज्ञानाविरतिप्रतिचरणा, प्रशस्ता सम्यग्दर्शनज्ञानचारित्रप्रतिचरणा, प्रतिक्रमणपर्यायता चास्या, यतः–शुभयोगेषु प्रतीपं क्रमणं प्रतिक्रमणमुक्तं, प्रतिचरणाप्येवम्भूतैवेति । प्रतिचरणायां प्रासाददृष्टान्त उच्यते——

पुरे क्वापि वणिकोऽपि, प्रासादं रत्नसम्भृतं । उपनिक्षिप्य भार्याया, दिग्यात्रायां ययौ स्वयम् ॥ १ ॥ व्यापृता स्वाङ्गभूषादौ, न सा प्रासादमैक्षत । पपाताथैकदेशोऽस्य, दध्यौ सैतावताऽस्य किम् ? ॥ २ ॥ भित्तौ पिप्पलपोतोऽथ, जातः सोऽप्यवहीलितः । नापनीतस्तया तेन, प्रासादोऽभाजि वर्द्धनात् ॥ ३ ॥ ततो वणिक् समायातो, भग्नं प्रासादमैक्षत । साऽथ ॥ २५ ॥

निस्सारिता तेन, प्रासादः कारितो नवः ॥ ४ ॥ अन्याऽऽनिन्ये प्रियोचैवं, प्रासादश्चेद्विनङ्क्ष्यति । ततस्तेऽहं नास्मीत्यु-क्त्वा, दिग्यात्रां गतवान् वणिग् ॥ ५ ॥ प्रासादं तं प्रिया सा च, त्रिसन्ध्यमवलोकते । भग्नं स्यात्तत्र यत्किञ्चित्, सर्वं संस्थापयत्यदः ॥ ६ ॥ प्रासादस्तादृगेवास्ती-द्ददर्श वणिगागतः । सर्वस्वस्वामिनी चक्रे, तेन तुष्टेन सा ततः ॥ ७ ॥ भोज-नाच्छादनभागा-ज्जाताऽन्या दुःखभागिनी । द्रव्ये प्रतिचरणाऽसौ, भवे चोपनयः पुनः ॥ ८ ॥ वणिग्वर्यं इहाचार्यः, प्रासादः संयमः पुनः । आदिशत्प्रतिचर्योऽय-मिति साधुजनस्य सः ॥ ९ ॥ सातगृद्धेन चैकेन, प्रत्यचारि न साधुना । स वणिक्पूर्वभार्येव, सञ्जातो दुःखभाजनम् ॥ १० ॥ प्रत्यचारि च येनासौ, प्रासादः संयमाभिधः । स निर्वाणसुखाभागी, जातः संसारपारगः ॥ ११ ॥ २ ॥

३-अथ परिहरणं, परिहरणा-सर्वप्रकारैर्वर्जना, सा च द्वेधा-प्रशस्ता अप्रशस्ता च, अप्रशस्ता ज्ञानादिपरिहरणा प्रशस्ता क्रोधादिपरिहरणा सर्वप्रकारैः, प्रतिक्रमणपर्यायता चास्याः प्रतिक्रमणमप्यशुभयोगपरिहरणमेवेति । अथ परिहरणायां दुग्धकायेन दृष्टान्तः, दुग्धकायो-दुग्धकाययष्टिः । [ ' कावड ' इति भाषायाम् ]

एकः कोऽप्यभवद्ग्रामे, कुत्रापि कुलपुत्रकः । अन्यान्यग्रामयोस्तस्यो-दूढमस्ति स्वसृद्वयम् ॥ १ ॥ तस्याभूद्दुहिता जाम्योः, पुत्रौ तेषां च यौवने । स्वस्वसूनुकृते जाम्यौ, पुत्र्यर्थं समभागते ॥ २ ॥ सोऽवदत्कस्य यच्छामि ?, पुत्र्येका तद्युवां सुतौ । अत्र प्रेषयतां दास्ये, ततः कृत्यविदः सुताम् ॥ ३ ॥ गते ते प्रेषितौ पुत्रौ, मातुलेन तदैव तौ । अर्पयित्वा घटावुक्तौ, दुग्धमानयतां व्रजात् ॥ ४ ॥ काययष्टिं गृहीत्वा तौ, गतौ भृत्वा पयोघटान् । निवृत्तौ तानथादाय, तथा चास्ति पथद्वयम्

प्रतिक्रमण-हेतुगर्भः । ॥ २६ ॥

॥ ५ ॥ नेदीयान् विषमः पन्था, दवीयांश्च समः पुनः । विषमं परिहृत्यैक-स्तत्राचालीत्समाध्वना ॥ ६ ॥ विषमेनापि नैकथ्या-चलतिस्म द्वितीयकः । स्खलत्पदस्य तस्यैको, भग्नः कुम्भोऽपरोऽपि च ॥ ७ ॥ अभाजि पतता तेन, रिक्त एवाथ सोऽभ्यगात् । समाध्वना शनैरन्यो, गृहीत्वा दुग्धमाययौ ॥ ८ ॥ तुष्टस्तस्मै ददौ पुत्रीं, द्वितीयं प्रेषयत्पुनः । मयोक्तं दुग्धमानेयं, शीघ्राशीघ्रागतिर्न तु ॥ ९ ॥ द्रव्ये परिहरणेयं, भावे चोपनयः पुनः । तीर्थकृत्कुलपुत्रोऽभू-च्चारित्रं पयमः [ घटे ] पदे ॥ १० ॥ तद्रक्षिभिः प्रयत्नेन, प्राप्या कन्येव निर्वृतिः । गोकुलं मानुषं जन्म, पन्थास्तत्र परन्तपः ॥ ११ ॥ स्थविराणामनिकटो, निकटो जिनकल्पिनाम् । रक्षेच्च चारित्रपयो-ऽगीतार्थो जिनकल्पिकः ॥ १२ ॥ दुष्प्रापा निर्वृतिस्तस्य, स्खलितस्य कथञ्चन । प्राप्याऽन्यैस्तु शनैः सिद्धि-श्चारित्रक्षीररक्षकैः ॥ १३ ॥ ३ ॥

४-इदानीं वारणा, साऽपि [ द्विधा- ] प्रशस्ताऽप्रशस्ता च, [ तत्र ] प्रशस्ता प्रमादवारणा अप्रशस्ता संयमादिवारणा, प्रतिक्रमणपर्यायता चास्या अपि स्फुटैवेति, वारणायां विषभोजनतडागेन दृष्टान्तः—

पुरे क्वापि नृपः कोऽपि, ज्ञात्वा परबलागमम् । ग्रामेषु भक्ष्यभोज्यादौ, मिष्टाम्भस्स्थानकेषु च ॥ १ ॥ वृक्षपुष्पफलादौ च, विषं सर्वेष्वयोजयत् । इतरस्त्वागतो राजा, तं ज्ञात्वा विषभावितम् ॥ २ ॥ घोषयामास सैन्ये स्वे, भक्ष्यभोज्यान्यमूनि यः । मिष्टाम्भांसि फलादीनि, भोक्ष्यते स मरिष्यति ॥ ३ ॥ दूरादानीय भोज्यानि, क्षाराम्भः प्रभृतीनि च । उपभुञ्जीध्वमित्येतां, घोषणां निशमय्य ये ॥४॥ निवृत्ता जीवितास्तेऽत्र, सर्वेऽप्यन्ये पुनर्मृताः । द्रव्यतो वारणोक्तैषा, भावे चोपनयः पुनः ॥ ५ ॥ राजा जिनोऽत्र विषयाः, विषाक्ताम्बुवदोऽज्झयत् । तत्सक्ता भवमभ्राम्य-न्निस्तीर्णास्त्वपरे भवम् ॥ ६ ॥ ४ ॥

वारणायां विषभोजनतडागदृष्टान्तः । ॥ २६ ॥

५–सम्प्रति निवृत्तिः, साऽपि द्विधा–प्रशस्ताऽप्रशस्ता च, प्रशस्ता प्रमादादीनां निवृत्तिः अप्रशस्ता समितिगुप्त्यादीनां, प्रतिक्रमणपर्यायता चास्याः प्रकटा। अत्र द्वयोः कन्ययोश्चित्रकर्यां 'कुविन्द'सुताराजसुतयोर्मध्ये द्वितीयया राजकन्यया दृष्टान्तो यथा–

एकत्र नगरे शाला–पतिः शालासु तस्य च। धूर्त्ता वसन्ति तेष्वेको, धूर्त्तो मधुरगीः सदा॥ १॥ कुविन्दस्य सुता तस्य, तेन सार्द्धमयुज्यत। तेनोचे साऽथ नश्यामो, यावद्वेत्ति न कश्चन॥ २॥ तयोचे मे वयस्याऽस्ति, राजपुत्री तया समम्। सङ्केतितोऽस्ति यथा द्वाभ्यां, पतिरेकः करिष्यते॥ ३॥ तामप्यानय तेनोचे, साऽथ तामप्यचालयत्। तदा प्रत्यूषे मदति, गीतं केनचनाप्यदः॥ ४॥ "जइ + फुल्ला कणियारया, चूअग! अहिमासयंमि घुट्ठंमि। तुह न

+ पुष्पिताः कुसिलकर्णिकाराः हे चूतक! अधिकमासे 'घोषिते' शब्दिते सति तव न 'क्षमं' युक्तं पुष्पितुं, यदि 'प्रत्यन्तका' नीचकाः कुर्वन्ति डमरका–ण्यशोभनानि ततः किं त्वयाऽपि कर्त्तव्यानि? नैवेत्यर्थः। इति टि० योधपुरीयप्रतौ।

प्रवृत्तैतामावश्यकनिर्युक्तिगतां गाथां यदधिकमासतिरस्करणं तद्बालिशतामदर्शनपुरस्सरं दृष्टिरागविस्फूर्जितमेव, यतो नोपन्यस्तैषा गाथा स्वाभिमततया श्रुतकेवलिश्रीमद्भद्रबाहुस्वामिभिः किन्तु पुरोऽन्येनोद्गीता औपदेशिकत्वेनोद्धृता, न चैवंविधायाः पराभिमतमान्यगाथा स्वाभिमततया... "रसीससाग्रदसैकगीतिकाया उद्धरणमयुक्तं, यतोऽनौपदेशिकत्वेऽपि "रोहिणिमणहियचयगहं" इत्यनेन रोहिण्याश्चन्द्रवल्लभात्वं "दीहरफणिंदनाले, महियरकेसरदिसासयदलिल्ले। ओपियइ कालभमरो, जणमयरंदं पुहवीपउमे॥ १॥" इत्यनया वैराग्यशतकगाथया वर्णितं पृथिव्याः सहस्रसामहदलिल्ले" इत्यनेन सूर्यस्य सहस्रकिरणत्वं च यत्कल्पनं तथैवौपदेशिकत्वे "दीहरफणिंदनाले, महियरकेसरदिसासयदलिल्ले। ओपियइ कालभमरो, जणमयरंदं पुहवीपउमे॥ १॥" इत्यनया वैराग्यशतकगाथया वर्णितं पृथिव्याः सहस्रनागमस्तकस्थायित्वं शास्त्रकारैस्तत्किं जैनसिद्धान्ताभिमतत्वेनाभिमन्तुं शक्यते? नैव कथमपि, एवमेवौपदेशिकतया "जइ फुल्ले" त्यादि·

प्रतिक्रमण-
हेतुगर्भः ॥

॥ २७ ॥

खमं फुल्लेउं, जइ पच्चंता करिंति डमराइं ॥ ५ ॥ " ' न खमं ' न युक्तं ' प्रत्यन्ता ' नीचकाः ' डमराणि ' विगुणरूपाणि, 'तैः' कृतं । श्रूयते राजकन्या मा, इत्यौ कुलमहान्कः । उपालब्धो वसन्तेन, कर्णिकारोऽधमस्तकः ॥ ६ ॥

---

गणनयाऽधिकमासगणनं न जैनदर्शनाभिमतं, जैनदर्शने तु " गोयमा ! अभिवड्ढियसंवच्छरस्स छव्वीसाइं पव्वाइं " इत्यादिना " पंच-संवच्छरिए जुगे बासट्ठि पुण्णिमाओ बावट्ठि अमावसाओ " इत्यादिना च शास्त्रप्रमाणेनाधिकमासो गणनायामस्त्येव, नैता-वन्मात्रमेव, प्रत्युत पर्युषणदिनगणनायामपि " एत्थ अधिमासगो चेव मासो गणिज्जति, सो वीसाए समं सवीसतिरातो मासो भण्णति चेव " इति बृहत्कल्पचूर्णिप्रामाण्यात्स्फुटमेवाधिकमासो गणनायामस्तीति सिद्ध्यति ।

अन्यच्च–प्रथमो मासोऽधिक इत्यपि वक्तुः पृथुस्थूलबुद्धेरेवानुमापकं, यत " अइरित्ता अहिगमासा " इति दशवैकालिकनिर्युक्तिवा-क्यवृत्तौ " अतिरिक्ता–उचितकालात्समधिका अधिकमासकाः " इति पाठात्तथा " सट्ठीए अइयाए, हवइ हु अधिमासगो जुगद्धम्मि । बावीसे पव्वसए, हवइ बीओ जुगंतम्मि ॥ १ ॥ वृत्तिः–एकस्मिन् युगे–प्राग्व्यावर्णितस्वरूपे पक्षाणां षष्ठ्यती-तायां, षष्टिसङ्ख्येषु पक्षेष्वतिक्रान्तेष्वित्यर्थः, एतस्मिन्नवसरे युगार्द्धप्रमाणे एकोऽधिकमासो भवति, द्वितीयस्त्वधिकमासकश्चान्द्रे द्वाविंशत्यधिके पर्वशते–पक्षशतेऽतिक्रान्ते युगस्यान्ते–युगस्य पर्यवसाने भवति " इति ज्योतिष्करण्डकवृत्तिप्रामाण्याद्द्वितीय एव मासोऽधिकत्वेन स्वीकृतः शास्त्रकारैः । तत्रैवोचितकालात्समधिकत्वस्य पक्षाणां षष्टेरतीतत्वस्य च घटमानत्वात् ।

किञ्च–श्रावणानन्तरमागते प्रथमे भाद्रपदेऽधिकत्वं यदि मन्यते तर्हि आषाढानन्तरमागते श्रावणेऽपि कथं नाधिकत्वं माननीयं भवेत् ? भवेच्चेत् तर्हि सुदुर्निवार एव सर्वेष्वपि मासेष्वधिकत्वप्रसङ्गः । इत्यलं प्रसङ्गेन ।

निवृत्तौ कुविन्द-राजा-ऽऽर्जयो-रुदाहरणं विफलत्वं च जइ फुल्लेत्या-दिगाथया-ऽधिकमा-सागणन-प्रयासस्य ।

॥ २७ ॥

पुष्पितो यदि किं शुष्कं ?, तवोपमतरोस्त्वया । अधिमासघोषणा किं, न श्रुतेत्यस्य गीः शुभा ॥ ७ ॥ चेत्कोविन्दी करोत्येवं, कर्त्तव्यं ? किं मयाऽपि तत् । निवृत्ता सा मिषाद्रत्न-करण्डो मेऽस्ति विस्मृतः ॥ ८ ॥ राजसूः कोऽपि तत्राद्धि, गोत्रजैस्त्रासितो निजैः । तस्यातं शरणीचक्रे, प्रदत्ता तेन तस्य सा ॥ ९ ॥ तेन श्वशुरसाहाय्या-न्निर्जित्य निजगोत्रजान् । पुनर्लेभे निजं राज्यं, पट्टराज्ञी बभूव सा ॥ १० ॥ निवृत्तिर्द्रव्यतोऽभाणि, भावे चोपनयः पुनः । कन्यास्थानीया मुनयो, विषया धूर्तसन्निभाः ॥ ११ ॥ यो गीतिगानाचार्यो-पदेशात्तेभ्यो निवर्त्तते । सुगतेर्भाजनं स स्याद्-दुर्गतेस्त्वपरः पुनः ॥ १२ ॥

द्वितीयोऽप्यत्र दृष्टान्तो, द्रव्यभावनिवर्त्तने । क्वचिद्गच्छे युवासाधुः, क्षमो ग्रहणधारणे ॥ १ ॥ इत्याचार्याः पाठयन्ति, तमादरपरायणाः । सोऽन्यदोदितदुष्कर्मा, निर्गच्छामीति निःसृतः ॥ २ ॥ तदा च तरुणाः शूराः, साभिमानमिदं जगुः । मङ्गलार्थं च तत्साधुः, सोपयोगः स शुश्रुवान् ॥ ३ ॥ " तरिअव्वा य पइन्निया, मरियव्वं वा समरे समत्थेणं । असरिसजणउल्लावा, न हु सहियव्वा कुले पसूएणं ॥ ४ ॥ " सूक्तं चैतत्केनाप्युक्तं " लज्जां गुणौघजननीं जननीमिवार्या-मत्यन्तशुद्धहृदयामनुवर्त्तमानाः । तेजस्विनः सुखमसूनपि सन्त्यजन्ति, सत्यस्थितिव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ५ ॥ " गीतिकार्थश्चायं-स्वामिसम्मानिताः केऽपि, सुभटाः प्राप्तकीर्त्तयः । रणाद्भग्नाः प्रणश्यन्तो, निजपक्षयशोऽर्थिना ॥ ६ ॥ ऊचिरे केनचिच्चैवं, नष्टाः शोभिष्यथ क्वचित् । ततः प्रतिनिवृत्तास्ते, परानीकमधर्षयन् ॥ ७ ॥ प्रभुसम्मानितास्तेऽथ, शोभन्तेस्म समन्ततः । एवं गीत्यर्थमाकर्ण्य, साधुरेवं व्यचिन्तयत् ॥ ८ ॥ रणस्थानीया प्रव्रज्या, भग्नोऽहं विदितोऽधुना । भ्रष्टोऽयमिति हीलिष्ये, जनैरसदृशैरपि ॥ ९ ॥ ततः प्रतिनिवृत्तोऽभूद् , दृढधर्मो

विशेषतः । आलोचितप्रतिक्रान्तो, गुरोरिच्छामपूरयत् ॥ १० ॥ ५ ॥

६–सम्प्रति निन्दा–ऽऽत्मसाक्षिकपात्मकुत्सा, साऽपि द्विधा–प्रशस्ताऽप्रशस्ता च, अप्रशस्ता संयमाद्याचरणविषया, प्रशस्ता त्वसंयमाद्याचरणविषया, यथा–"हा !! दुट्ठु कयं हा !! दुट्ठु, कारियं दुट्ठु, अणुमयं हत्ति । अंतो अंतो डज्झइ, झुसिकब्भ दुमो वणदवेणं ॥१॥ प्रतिक्रमणपर्यायता चास्याः सुगमा । निन्दायां द्वयोः कन्ययो[र्मध्ये]द्वितीयचित्रकरसुतोदाहरणं—

पुरे क्वापि नृपोऽन्येषां, राज्ञां चित्रसभा शुभा । मम नास्तीति विज्ञाय, कारयित्वा महासभाम् ॥ १ ॥ समभागार्पिता चित्र–कारिणां चित्रयन्ति ते । तत्रैका चित्रकृत्पुत्री, भक्तमानयते पितुः ॥ २ ॥ राजाऽश्वेन रयेणैति, कष्टान्नष्टाऽथ सा ततः । तथाऽऽनीतं च भक्तेऽगा–देहचिन्ताकृते पिता ॥ ३ ॥ केकिपिच्छं तयाऽलेखि, वर्णकैस्तत्र कुट्टिमे । तदाऽऽयातो नृपः कुर्व–स्तत्रैकाकी गतागतम् ॥ ४ ॥ दृष्ट्वा मयूरपिच्छं तद्–गृहीतुं वाहितः करः । नखशु(पं)क्तिश्च भग्नाऽस्य, हसित्वा साऽवदत्ततः ॥ ५ ॥ मूर्खमञ्चस्त्रिभिः पादै–र्नास्थात्तुर्योऽधुनाऽभवः । राजाऽपृच्छत्कथं ? सोचे, राजमार्गेऽश्व निष्कृपात् ॥ ६ ॥ आगच्छ–तोऽस्त्रिबिना, तुरगेणाश्ववारतः । आनयन्ती पितुर्भक्तं, स्वपुण्यैर्जीविताऽस्म्यहम् ॥ ७ ॥ एष एकोऽभवत्पादो, द्वितीयः क्ष्मापतिः पुनः । येन चित्रकृतां चित्र–सभाभागः समोऽर्पितः ॥ ८ ॥ यावान् बहुसहायानां, तावानेकस्य मे पितुः । तृतीयो मे पिता पादो, येन चित्रसभामिमाम् ॥ ९ ॥ निष्ठां नीतं चित्रयता, लब्धं प्रागर्जितं च यत् । यदर्थाचमयानीतं, शीतं तत्कीदृशं भवेत् ? ॥ १० ॥ तत्रापि देहचिन्ताया–मानीते सति गच्छति । राजोचेऽहं कथं ? तुर्यः, साऽवदत्कथ्यतेऽधुना ॥ ११ ॥ केकिपिच्छं कुतोऽत्रेति, दृष्ट्वा सम्यगवीक्ष्य च । अविमृश्य क्षिपन् पाणिं, किं न मूर्खोऽसि ? सोऽस्म्यहम् ॥ १२ ॥

राज्ञा ययौ भोजयित्वा, पितरं साऽप्यगाद्गृहम् । तन्माता भाणिता राज्ञा, देहि पुत्रीं महीपतेः ॥ १३ ॥ सोचे वयं दरिद्राणि, नृपार्चां कुर्महे ? कथम् । राज्ञा द्रव्येण तद्गेहं, भृतं सा पर्यणीयत ॥ १४ ॥ शिष्टा दासी तयाऽप्राक्षीत्, सुप्ते तत्रैत्य राजनि । यावन्निद्राति राजेन्द्र-स्तावदाख्याहि मे कथाम् ॥ १५ ॥ सोवाचैकस्य पुत्र्येका, समभेयुर्वरास्त्रयः । मात्रा भ्रात्रा च पित्रा च, पृथग्दत्तां जिघृक्षवः ॥ १६ ॥ सा रात्रौ भोगिना दष्टा, दग्ध एकस्तया सह । एकोऽनशन-मासीन, एकेनाराधितः सुरः ॥ १७ ॥ सोऽदात्सञ्जीवनामन्त्रं, तेन सा स च जीवितौ । उपस्थितास्त्रयोऽप्येते, कस्य देयेति कथ्यताम् ॥ १८ ॥ दास्यूचे देवि ! नो वेद्मि, त्वमेवाख्याहि कस्य ? सा । सोचे स्वप्स्यामि निद्रेति, कल्ये ते कथयिष्यते ॥ १९ ॥ राज्ञा तस्याः कथाक्षेपा-द्द्वितीयेऽप्यह्नि वारकः । दत्तस्तथैव साऽप्राक्षी-द्दास्यपि चित्रकराङ्गजा ॥ २० ॥ भ्राताऽभूद्यः सहाजीवत्, स पिता येन जीविता । आसीनोऽनशने यस्तु, सा देया तस्य कन्यका ॥ २१ ॥ पृष्टा दास्याऽन्यदाख्याहि, साऽऽख्यदेकस्य भूपतेः । मणिदीपकृतोद्द्योताः, कलादा भूगृहस्थिताः ॥ २२ ॥ घटयन्त्याभरणान्य-निर्यान्तोऽन्तःपुरीकृते । एकः पप्रच्छ का वेला ?, पृष्टः प्राह निशाऽधुना ॥ २३ ॥ दास्यूचे स कथं वेत्ति ?, यश्चन्द्रार्कौ न पश्यति । स्वप्स्याम्येतर्हि देव्यूचे, कल्ये कथयिताऽस्मि ते ॥ २४ ॥ द्वितीयेऽह्नि तथैवाख्य-द्राज्यन्धत्वेन वेत्ति सः । पृष्टा दास्या पुनः स्माह, राज्ञे कश्चित्करद्वयम् ॥ २५ ॥ मञ्जूषायां विनिक्षिप्य, क्षेपयामास वारिधौ । चिरेण तटलग्नासौ, दृष्टा केनाप्यगृह्यत ॥ २६ ॥ उद्घाट्यैक्ष्य नरौ पृष्टौ, क्षिप्तयोः कति वां दिनाः । आख्यदेको दिनं तुर्यं, दास्यूचे वेत्त्यसौ कथम् ? ॥ २७ ॥ द्वितीयेऽह्नि तथैवाख्य-द्वेत्ति तुर्यज्वरीति सः । पृष्टाऽन्यत्पुनराचख्यौ, काप्यास्तां द्वे सपत्निके ॥ २८ ॥ एका रत्नवती चान्या, निरत्ना

सा स्नेहतोऽथ ताम् । व्यश्वासयदपृच्छच्च, यान्त्यायान्ती जिहीर्षया ॥ २९ ॥ रत्नान्याधाय घटे क्षिप्त्वा, न्यस्यालिप्य घटाननम् । वान्यस्या विजने हृत्वा, तथैवालिप्य तं घटम् ॥ ३० ॥ लिप्तेऽप्यवेद्धृतान्याद्या, दास्यूचे वेत्सि? सा कथम् । द्वितीयेऽह्नि तथैवाख्यत्, स हि काचमयो घटः ॥ ३१ ॥ वीक्ष्यन्ते विद्यमानानि, न वीक्ष्यन्ते हृतानि तु । अन्यामाह पुनः पृष्टा, काप्येकस्य महीपतेः ॥ ३२ ॥ सहस्रयोधी वैद्यश्च, रथकारो निमित्तवित् । चत्वारः सेवकास्तस्य, पुत्र्येका चास्ति सुन्दरी ॥ ३३ ॥ हृत्वा तां खेचरोऽनैषीत्, ज्ञायते न क्वचिद्गतः । यो ममानयते पुत्रीं, राजोचे तस्य तां ददे ॥ ३४ ॥ निमित्त्याख्यद्दिशं चक्रे, रथकृद्व्योमगं रथम् । चत्वारोऽपि रथेनेयुः, सहस्रेण हतः खगः ॥ ३५ ॥ स कन्यां हन्यमानोऽहृत्, वैद्योऽजीवयदौषधैः । चतुर्भिरपि सा निन्ये, चतुर्णामप्यदान्नृपः ॥ ३६ ॥ कन्योचे कथमेकाऽपि, चतुर्णां स्यामहं पितः ! । वरिताऽहं तस्य यः सार्द्धं, मया वह्नौ प्रवेक्ष्यति ॥ ३७ ॥ प्रविश्याऽऽदास्यतेऽग्नौ को ?, राज्ञ्युवाच हला ! वद । साऽवददेवि ! नो वेद्मि, तथैवाख्यत्परेऽहनि ॥ ३८ ॥ ज्ञात्वा निमित्ती प्रश्नार्थं–यथैषा म्रियते नहि । स्वीचक्रे तेन नान्यैः सः, चितां सह तयाऽविशत् ॥ ३९ ॥ अग्नौ लग्ने निस्सृतौ तौ, प्राक्खानितसुरङ्गया । ततः स तामुपायंस्त, पृष्टाऽऽख्यदपरां कथाम् ॥ ४० ॥ क्षिप्यैकयोत्सवे यान्त्या, सुवर्णकटकद्वयम् । कुतोऽप्ययाचितेनापि, धृत्वा तन्मूल्यरूप्यकान् ॥ ४१ ॥ तयाऽक्षेपि सुताहस्ते, न पूर्णोऽप्युत्सवेऽर्पितम् । विस्मृत्याऽब्दानि जातानि, मार्गिता तेन साऽब्रवीत् ॥ ४२ ॥ गृहाणोत्तार्य मोचीर्णं, प्रौढीभूतसुताकरात् । तयोक्तं कटके मुञ्च, गृहाण रूप्यकाः पुनः ॥ ४३ ॥ ईदृशे कटके पद्मा, घटयित्वाऽपरे ददे । सा नेच्छदेवमेव, तत्किं छेद्यौ ? सुताकरौ ॥ ४४ ॥ बोध्यते ? सा कथं ब्रूहि, सोचे कस्त्वां विनाऽस्ति ? वित् । द्वितीयेऽह्नि

तथैवाल्प–चपा त एव रूप्यकाः ॥ ४५ ॥ यद्यर्घ्यते तत्कटक–द्वितयमप्येतदर्घ्यते । षण्मासानीदृगाख्याने, राजानीतस्तया गृहे ॥ ४६ ॥ तस्याश्छिद्राणि वीक्षन्ते, सपत्न्यो नित्यमीर्ष्यया । सा चोपवरकस्यान्तः, स्थित्वा चित्रकरात्मजा ॥ ४७ ॥ निनिन्द स्वं पुरस्कृत्य, वस्त्रभूषादिपैतृकं । जीवेदमेव नेपथ्यं, तावकं परमार्थतः ॥ ४८ ॥ राजवंशभवाः पत्न्यो, राज्ञः सन्ति मनोरमाः । असम्भाव्येदृशर्द्धिस्त्वं, कीदृशी कारुपुत्रिका ॥ ४९ ॥ विजिताऽप्सरसः पुत्री, मुक्त्वैतास्त्वां महीपतिः । यदनुवर्त्तते पुण्यात्, गर्वं तज्जीव ! मा कृथाः ॥ ५० ॥ प्रत्यहं कुर्वतीमेवं, तत्सपत्न्यः कथञ्चन । ज्ञात्वाऽऽख्यन् भूभुजो देव !, प्रविश्यान्तर्गृहं कुधीः ॥ ५१ ॥ कार्मणं कुरुते तेऽसौ, रक्षेःस्वं यत्नतस्ततः । राजा स्वयं तदालोक्य, तुष्टस्तत्क्रियया तया ॥ ५२ ॥ विदधे पट्टराज्ञीं तां, गुणैः को नानुरज्यते ? । तदियं द्रव्यतो निन्दा, भावनिन्दा यतेस्त्वसौ ॥५३॥ कथञ्चन भवे जीव !, भ्राम्यता जन्म मानुषम् । लब्धं तत्रापि चारित्रं, यतः पूज्यो जनेऽभवः ॥ ५४ ॥ मा कार्षीर्जातु तद्गर्वं, यथाऽहं सुबहुश्रुतः । यदि वोत्तमचारित्रो, येन ते सुगतिर्भवेत् ॥ ५५ ॥ ६ ॥

७–इदानीं गर्हा–परसाक्षिकीकुत्सैव, एषाऽपि द्विभेदा–प्रशस्ताऽप्रशस्ता च, तत्राप्रशस्ता संयमाद्याचरणविषया प्रशस्ता पुनरसंयमाद्याचरणविषया, प्रतिक्रमणपर्यायता चास्याः प्रसिद्धैव, द्रव्यगर्हायां पतिमारिकादृष्टान्तः—

एकत्राध्यापको विप्र–स्तस्यासीत्तरुणी प्रिया । ऊचे भर्त्रा बलिं देहि, काकेभ्यः साऽप्यवोचत ॥ १ ॥ बिभेम्यहमिति छात्रा, उपाध्यायनिदेशतः । रक्षन्ति वारकेणैतां, तत्रैकोऽचिन्तयत्सुधीः ॥ २ ॥ न मुग्धा किन्त्वसत्येषा, स तच्चरितमीक्षते । नर्मदापरकूले च, गोपेन सममस्ति सा ॥ ३ ॥ नर्मदां निशि कुम्भेनो–त्तरन्ती चास्ति साऽन्यदा । सन्त्युत्तरन्तश्चौराश्च,

प्रतिक्रमण-हेतुगर्भः । ॥ ३० ॥

तेष्वेको जलजन्तुना ॥ ४ ॥ आर्त्तो वर्दस्तथा प्रोचे, पिधेहस्याक्षि मुच्यसे । मुक्तस्तथा कृतेऽप्योचे, कुतीर्थेनावतेर किं ? ॥५॥ स तच्छ्रुत्वा निवृत्तोऽथ, द्वितीयेऽहनि खण्डिकः । बलिं ददानां रक्षन्तीं, मन्दस्वरमवोचत ॥ ६ ॥ दिवा बिभेषि काकेभ्यो, रात्रौ तरसि नर्मदाम् । कुतीर्थानि च जानासि, जलजन्त्वक्षिरोधनम् ॥ ७ ॥ साऽवदत्किं करोम्यत्र, यन्नेच्छन्ति भवादृशाः । उपाचचार तं साथ, स ऊचेऽध्यापकात्रपे ॥ ८ ॥ सा दध्यौ मारयाम्येतं, भर्त्ताऽसौ स्याद्यथा मम । विनाश्य पिटके क्षिप्त्वा, गताऽटव्यां समुज्झितुम् ॥ ९ ॥ व्यन्तर्याऽस्तम्भि पिटकं, मूर्ध्नि साऽथ वनेऽभ्रमत् । गलत्युपरि मांसं तद्, बाध्यमानाऽथ सा क्षुधा ॥ १० ॥ उद्विग्ना स्वचरित्रेण, गर्हते स्वं गृहे गृहे । पतिघ्न्या देहि मे भिक्षा–मेवं कालो बहुर्गतः ॥ ११ ॥ नमन्त्या अन्यदा साध्वीं, पपात पिटकं भुवि । अतः साऽथार्हद्दीक्षं, कार्या दुष्कृतगर्हणा ॥ १२ ॥ ७ ॥

८–इदानीं शुद्धि–र्विमलीकरणमित्यर्थः । सा च द्वेधा–प्रशस्ताऽप्रशस्ता च, प्रशस्ता ज्ञानादेः अप्रशस्ता चाशुद्धस्य सतः क्रोधादेर्वैमल्याधानं–स्पष्टतापादनमिति । प्रतिक्रमणपर्यायता चास्याः स्फुटैवेति । शुद्धौ वस्त्रागदाभ्यां दृष्टान्तः—

पुरं राजगृहं नाम, श्रेणिकस्तत्र भूपतिः । रजकस्यार्पयत्क्षौम–युगलं क्षालनाय सः ॥ १ ॥ तेन तद्भार्ययोर्दत्तं, पर्विणो कौमुदीमहे । अभयश्रेणिकौ तत्र, पश्यन्तौ छद्ममुत्सवम् ॥ २ ॥ तत्ताम्बूलार्द्रमैक्षिष्टां, रजकस्ते गृहागते । दृष्ट्वा क्षौमे सन्ततर्ज, कल्हात् क्षारैरशोधयत् ॥ ३ ॥ प्रातरानीतवान् पृष्टः, सद्भावं रजकोऽब्रवीत् , द्रव्यशुद्धिर्भावशुद्धि–स्तत्कालालोचने यतेः ॥ ४ ॥

वस्त्रदृष्टान्तो लोकप्रसिद्ध्या किञ्चिदुच्यते–यथा लोके महतां राजादीनां विविधानि महार्घाणि वासांसि मलरहितान्युत्सवादौ निधीयन्ते, तान्येव व्यापार्यमाणानि कतिपयदिनैर्मलिनीभूतानि धावनार्थं रजकप्रभृतिमलिनजातीनामर्पणायोच-

शुद्धौ वस्त्रागद-योर्दृष्टान्तौ। ॥ ३० ॥

मार्जारादेरुच्चार्य भूमौ निक्षिप्यन्ते, ततस्तैरेकीकृत्य ग्रन्थौ बध्वा स्वगृहे आनीय क्षारादौ प्रक्षिप्यन्ते, ततश्च ग्रन्थिबद्धानि रासभाधिरूढानि विधाय चतुष्पथमध्येन सर्वजनसमक्षं जलाश्रये नीयन्ते, तत्र च रजकादिभिः शिलादौ कुट्टयित्वा पादादिभिर्मर्दयित्वा क्षारादिदानपुरस्सरं निर्मलानि क्रियन्ते, तान्येवासादितशुद्धभावानि अगुरुप्रभृतिभिर्वासयित्वा राजादीनामुपनीयन्ते, पुनरप्युत्तमाङ्गादौ यथास्थानं निधीयन्ते, एवं कश्चित्पुरुषः प्रौढिं प्राप्तोऽपि रागद्वेषादिभिर्विरूपकर्माणि विधाय मलिनीभूतो निजस्थानाद्भ्रश्यति, तस्य महिमा चापगच्छति, चौर्यादिविरुद्धकर्मकारी च शिरोमुण्डनादिपुरस्सरं रासभाधिरूढं कृत्वा सर्वजनसमक्षं मातङ्गादिभिर्विविधैर्विडम्बनाप्रकारैर्विडम्ब्यते, सर्वलोकैश्च निन्द्यते, कश्चिद्धन[ रास ]प्रदानादिदण्डेन सर्वस्वापहारेण दिव्यकरणादिना वा शुद्ध्यति, पुनरपि विशुद्धकर्मकरणेन महिमानं चाधिगच्छति । एवं साध्वादिरपि ज्ञानाद्याचारातिचारसमाचरणतः प्रमादवशो गर्हास्पदं भवति, श्रीगुरुसमक्षं मनोवाक्कायविशुद्ध्या शुद्धालोचनाग्रहणादिना यथागमं श्रीगुरुदत्तविशुद्धिहेतुकविविधतपस्तपनप्रकारैरात्मानं शुद्धं विधाय पुनरपि महिमानमधिगच्छति ।

पुनरपि शुद्धावेवागददृष्टान्तो यथा–पुरं रोद्धुं समायाति, परसैन्ये पुराधिपः । विनाशयितुमम्भांसि, वैद्यादानाययद्विषम् ॥ १ ॥ यवमात्रं विषं वैद्यो, गृहीत्वाऽगान्नृपोऽकुप्यत् । विषं सहस्रवेधीदं, वैद्योऽवक् मा कुप प्रभो ! ॥ २ ॥ कथमेतत् करी तेना–मार्यी क्षीणायुरस्य तत् । श्मश्रुमुत्पाट्य तत्राद्रा–द्विषीभूतः स कुञ्जरः ॥३॥ तद्भुजोऽपि विषीभाव–स्तस्याप्यादी विषीभवेत् । सहस्रं यावदेवं तत्, कुरुते विषरूपताम् ॥ ४ ॥ राजोचे वालनाऽप्यस्ति ?, स ऊचेऽस्तीत्यथानयत् । औषधं तल्लवं दत्वा, शमयामास तद्विषम् ॥ ५ ॥ एवं वैद्यवत्साधुनाऽपि निन्दादिरूपागदेनातिचारविषमपसारणीयम् ॥ ८ ॥

उक्तानि प्रतिक्रमणस्यैकार्थिकानि, साम्प्रतं प्रत्यहं यथा श्रमणेनातिचारशुद्धिर्विधीयते तथा मालाकारदृष्टान्तेन प्रतिपाद्यते–" आलोयणमालुंचन-वियडीकरणं च भावसोही य। आलोइयम्मि आरा-हणा अणालोइए भयणा ॥ १ ॥" यथा कश्चिन्मालिको द्विसन्ध्यं 'आलोकनं' कुसुमानि वीक्ष्य 'आलुञ्चनं' ग्रहणं, ततो 'विकटीकरणं' विकसित-मुकुलितानां विभजनं, च शब्दात्ततो ग्रथनं [ करोति ], ततो विक्रयाल्लाभे सति 'भावतः' परमार्थतः शुद्धि-मनःप्रसन्नता तस्य स्यात्, यस्त्वेवं न करोति तस्यैतन्न स्यात्, एवं साधुरपि कायोत्सर्गस्थः प्राभातिकोपधिमुखवस्त्रिकाप्रत्युपेक्षादेः प्रतिक्रमणाद्यकायोत्सर्गान्तस्य दैवसिकातिचारस्यावलोकनं करोति, पश्चादालुञ्चनं-सञ्जातापराधग्रहणं, ततो 'विकटीकरणं' गुरुलघ्वपराधविभजनं, चशब्दादप्रतिसेवनाप्रकारेण ग्रथनं, ततो गुरोर्निवेदने भावशुद्धिः। एवमालोचिते आराधना मोक्षमार्गस्य अनालोचिते विभजना-कदापि स्यात्कदापि न स्यात्। " आलोयणापरिणओ, सम्मं समुवट्ठिओ गुरुसगासे। जइ अंतरा उ कालं, करिज्ज आराहओ तहवि ॥ १ ॥ इड्ढीइ गारवेण य, बहुस्सुअमएण वावि दुच्चरियं। जो न कहेइ गुरूणं, नहु सो आराहगो भणिओ ॥ २ ॥"

एवं प्रतिक्रमणं तस्य भेदपर्यायैर्व्याख्यातं। सम्प्रति प्रतिक्रान्तव्यमुच्यते, तच्च पञ्चधा–"मिच्छत्तपडिक्कमणं, तहेव अस्संजमे पडिक्कमणं। कसायाण पडिक्कमणं, जोगाण य अप्पसत्थाणं ॥१॥ संसारपडिक्कमणं, चउव्विहं होइ आणुपुव्वीए। भावपडिक्कमणं पुण, तिविहं तिविहेण नायव्वं ॥२॥ मिच्छत्ताइ न गच्छइ, न य गच्छावेइ नाणुजाणेइ। जं मणवयकाएहिं, तं भणियं भावपडिक्कमणं ॥३॥" इह भवमूलं कषायास्तत्प्रतिक्रमणोदाहरणं यथा—

+ द्वौ साधू त्रिदिवं प्राप्तौ, सङ्केतमिति चक्रतुः । प्राग्मोत्स्यादौ नरत्वं यः, प्रतिबोध्यः परेण सः ॥ १ ॥ पुरे लक्ष्मीपुरे नाम्ना, इभ्यस्य श्रेष्ठिनः प्रिया । आराधयदपत्यार्थैः, पुत्रार्थं नागदेवताम् ॥ २ ॥ तया भविष्यतीत्युक्तं, तत्र स्वर्गागतः सुतः । तयोः स्वर्गतयोरेक-श्च्युत्वा तस्याः सुतोऽभवत् ॥ ३ ॥ नागदत्तेति दत्ताह्वो, द्वासप्ततिकलापटुः । गन्धर्वनागदत्तोऽसौ, ख्यातो गन्धर्वकौशलात् ॥ ४ ॥ भुजङ्गकेलिव्यसनी, भवसौख्यं भुनक्ति सः । मुहुर्बोधयते देवो, न पुनः प्रतिबुध्यते ॥ ५ ॥ देवोऽथाव्यक्तलिङ्गेनो-पात्तसर्पकरण्डकः । उद्यानिकायां यातस्य, तस्य गच्छन्नदूरतः ॥ ६ ॥ मित्रैरदर्शि देवाय्यं, दृश्यते सर्पखेलकः । गत्वा तदन्तिकेऽप्राक्षीत्, किमत्रास्ति ? सुरोऽवदत् ॥ ७ ॥ सर्पाः सन्त्यत्र गन्धर्व-नागदत्तस्तमूचिवान् । रमस्व मम सर्पैस्त्वं, तव सर्पैरहं रमे ॥ ८ ॥ देवश्चिक्रीड तत्सर्पै-र्दष्टोऽपि म्रियते स्म न । गन्धर्वनागदत्तोऽथा-मर्षाद्रंस्येऽह-मित्यवक् ॥ ९ ॥ देवोऽवोचत दष्टस्त्वं, मम सर्पैर्मरिष्यसि । निर्बन्धे मण्डलं तत्रा-लिख्य सर्पकरण्डकान् ॥ १० ॥ मुक्त्वा चतुर्दिशं देवः, सर्वं सम्पिण्डय तज्जनम् । तद्ग्रन्थकार एवाह, तदानीं यदुवाच सः × ॥ ११ ॥ “ गंधव्वनागदत्तो, इच्छइ सप्पेहिं खिल्लिउं इहयं । सो जइ कहं चि * खज्जइ, इत्थ हु दोसो न कायव्वो ॥ १२ ॥ ” ममेति शेषः । तेषां

+ कषायप्रतिक्रमणे ज्ञातमुच्यते-द्वौ संयतौ स्वर्गतौ, सङ्केतं, एकश्च्युतो नागदेवताराधनाजातः श्रेष्ठिगृहे, नागदत्त इति नाम कृतं, यौवने द्विसप्ततिकलाकुशलो गन्धर्वकलाकुशलत्वाद्गन्धर्वनागदत्तो भण्यते । ततः स गारुडी जातो बहुमित्रयुतो हिण्डते । इतो देवो रजोहरणादिविनाऽव्यक्तलिङ्गेन चतुस्सर्पकरण्डिक आगात् । स्वजनादिसमक्षमुक्तवान् । हि. योध० प्रतौ । × यथा चतसृ-ष्वपि दिक्षु मण्डलेषु स्थापितानां सर्पाणां माहात्म्यमश्रावकमयमथाऽऽह । * ‘ खाद्यते ’ भक्ष्यते ।

सर्पाणां माहात्म्यं तदुक्तं ग्रन्थकृदाह–" + तरुणदिवायरनयणो, विज्जुलयाचंचलग्गजीहालो । घोरमहाविसदाढो, उक्का इव पज्जलियरोसो ॥ १३ ॥" उल्केव–ज्वालेव प्रज्वलितो रोषो [ यस्य स ] रोषाख्यो नागः । " डक्को जेण मणूसो; कयमकयं वा न याणइ बहुंपि । अदिस्समाणमच्चू, कह घिच्छसि ? तं महानागं ॥ १४ ॥" प्रदीप्यसि त्वं । ' अदृश्यमानः ' करण्डकस्थो मृत्युहेतुत्वान्मृत्युः × । तथा " * मेरुगिरितुंगसिहरो, अट्ठफणो जमलजुअलजीहालो । दाहिणपासंमि ठिओ, माणेण वियट्टई नागो ॥ १५ ॥" यमं लात्यनेकार्थत्वाद्धातूनां लगयति इति यमलं, प्राकृतत्वाच्छन्दव्यत्यये जिह्वायुगलं यस्य स यमलजिह्वायुगलः, मानेन हेतुभूतेन विवर्त्तते–विशेषेण सोत्साहं वर्त्तते । "डक्को जेण मणूसो, थद्धो न गणेइ देवरायं पि । तं मेरुपव्वयनिभं, कह घिच्छसि ? तं महानागं ॥ १६ ॥" § सललियबिल्लहलगई, सत्थिअलंछणफडंकियपडागा । मायामइया नागी, नियडिअकवडवंचणा कुसला ॥ १७ ॥" स्वस्तिकलाञ्छनाङ्किता फणपताका, निकृति–रान्तरो दम्भः ' कपटं ' वेषपरावर्त्तादि, आभ्यां वञ्चनाकुशला ।

+ तरुणदिवाकरनयनो–रक्ताक्षः, विद्युल्लतेव चञ्चलाग्रा–जिह्वा यस्य स तथा । ( योध० टि० ) × अदृश्यमानोऽयं करण्डकस्थो मृत्युर्वर्त्तते । अयं क्रोधसर्पः, क्रोधसमन्वितस्तरुणदिवाकरनयन एव स्यादित्यादियोजना ज्ञेया । * मेरुगिरेस्तुङ्गानि–उत्तुङ्गानि, तैः सदृश उन्नत इत्यर्थः । अष्टफणाः जात्यादीनि द्रष्टव्यानि । ' यमं ' मृत्युं ' लाति ' लगयतीति यमला ' युगला ' युग्मा जिह्वा यस्य स तथा, दक्षिणपार्श्वे स्थितो दक्षिणदिग्न्यासस्तु दाक्षिण्यबल–उपरोधवतो मानप्रवृत्तेः, मानेन हेतुभूतेन व्यावर्त्तते नागः । § सललिता–वक्री, बेल्लहला–स्फीता गतिर्यस्याः सा तथा । [ टि० योध० ]

"तं वसि + वालग्गाही, अणोसहिबलो अ अपरिहत्थो अ। सा य चिरसंचियविसा, गहणम्मि वणे वसइ नागी ॥ १८ ॥" व्यालाः-सर्पास्तेषां ग्राही 'अपरिहत्थो' ऽदक्षः, गहने वने-दुस्साध्ये कार्यजा(ते)ले वसति। "हुज्ज हु ते विणिवाओ, तीसे दाढंतरं उवगयस्स। × अप्पोसहिमंतबलो, नहु अप्पाणं चिगिच्छिहिसि ॥ १९ ॥ उच्छरमाणो सव्वं, महालउ पुन्नमेहनिग्घोसो। उत्तरपासम्मि ठिओ, लोहेण वियट्टई नागो ॥ २० ॥" * उच्छरमाणो सव्वं-सर्वं जगदभिभवन्। लोभश्चासौ सर्वकषायाधिकबलत्वादिनश्च (!) लोभेनः, प्राकृतत्वाद्विभक्तिलोपे स एव नागः। "इक्को जेण मणूसो, होइ महासागरोव्व दुप्पूरो। तं सव्वविससमुदयं, कह † घिच्छसि? तं महानागं ॥ २१ ॥ एए ते पावाही, चत्तारि वि कोहमाणमयलोभा। § जेहिं सया संतत्तं, जरियमिव जगं कलकलेइ ॥ २२ ॥" मय-त्ति आर्षत्वान्मायाशब्दे वर्णद्वयस्यापि ह्रस्वत्वं। "एएहिं जो उ खज्जइ, चउहिं वि आसीविसेहिं पावेहिं। ‡ अवसस्स नरयपडणं, नत्थि हु से आलंबणं किंचि ॥ २३ ॥" एवमाख्याय

+ इयमेवम्भूता [माया] नागी, त्वं च 'व्यालग्राही' सर्पग्रहणशीलोऽनौषधीबलश्चा-परिहस्तश्चा-दक्षः। 'गहने' सङ्कुले 'वने' कार्यजाले वसति। × त्वं अल्पौषधिमन्त्रोऽबलोऽतो नैवात्मानं चिकित्सिष्यसि। इयं मायानागी। * 'उच्छरमाणो'त्ति अभिभवत् सर्वं वस्तुमहालयः, सर्वत्रानिवारितत्वात्। उत्तरदिग्न्यासस्तु सर्वोत्तरलोभ इति ख्यापनार्थः, लोभेन हेतुभूतेन व्यावर्तते वर्धयति वा नागः। † ग्रहीष्यसि त्वं, अयं लोभसर्पः। § यैः [सदा] सन्तप्तः सन् ज्वरितमिव जगत्कलकलयति-अव्यक्तो क(क)थयति। ‡ तस्यावशस्य सतो नरकपतनं स्यात्, एवमुक्त्वा ते मुक्ताः, स दृष्टः पतितः, मिश्रदत्तौषधि[भि]र्नं गुणस्तस्य स्वजनः पादयोः पतितः, उज्जीवनार्थं, देवः आह।

ते मुक्ताः, स तैर्दष्टोऽपतन्मृतः । ऊचे सुरोऽभवदिदं, वारितोऽयं स्थितो न यत् ॥ २४ ॥ प्रागुक्ताः सुहृदस्तेन, भेषजानि व्यधुः परं । न गुणः कोऽप्यभूत्पश्चा-त्तल्लोकस्तं कृताञ्जलिः ॥ २५ ॥ पतित्वा पादयोरूचे, जीवयामुं प्रसद्य नः । देवोऽवोच-दहं दष्टो, जीवितः क्रिययेदृशा ॥ २६ ॥ क्रियां करोति यद्येतां, ततो जीवत्यसावपि । न पालयति चेन्मौढ्या-न्म्रियते जीवितोऽपि सन् ॥ २७ ॥ एतच्चरित्रं शास्त्रकृद्गाथाभिराह–" एएहिं अहं खइओ, चउहिं वि आसीविसेहिं पावे-हिं । विसनिग्घायणहेउं, चरामि विविहं तवोकम्मं ॥ २८ ॥ सेवामि सेलकाणण + –सुसाणसुन्नघररुक्ख-मूलाइं । × पावाहीणं तेसिं, खणमवि न उवेमि वीसंभं ॥ २९ ॥ * अच्चाहारो न सहइ, अइनिद्धेणं विसया § उइज्जंति । जायामायाहारो, तंपि पगामं न भुंजामि ॥ ३० ॥ जायामायाहारो–यावता संयमयात्रा निर्वहति तावन्मात्रमाहरामि । " † उस्सन्नकयाहारो, अहवा विगईविवज्जिआहारो । जं किंचि कयाहारो, ‡ अवउज्झिय-थोवआहारो ॥ ३१ ॥" उस्सन्नं–प्रायशोऽकृताहारः, अवउज्झियथोव त्ति–उज्झितधर्माख्यभिक्षास्तोकाहारः । एवं क्रिया-युक्तस्य गुणविशेषमाह–" इह जो थोवाहारो, थोव य भणिओ य थोवनिद्दो य । थोवोवहि–उवगरणो, तस्स हु देवावि पणमंति ¶ ॥ ३२ ॥ " ऊचुस्तत्स्वजनास्तेऽथ, करोत्वेष क्रियामिमाम् । जीवन्तमेव द्रक्ष्यामः, सोऽथ

+ ' काननानि ' दूरवर्त्तिवनानि । × ' पापाहीनां ' पापसर्पाणां नोपैमि विश्रम्भं । * ' अत्याहारः ' प्रभूताहारः । § विषयाः शब्दादय उदीर्यन्ते, ततश्च यात्रामात्राहारः । † ' उस्सन्नं ' प्रायशोऽकृताहारस्तिष्ठामि । ‡ उज्झितधर्मा स्तोक आहारो यस्य स तथा । एवं क्रियायुक्तस्य गुणानाह । ¶ एवं यदि करोति तदा उत्तिष्ठति । स्वजनैर्मतं । देवः पूर्वाभिमुखः स्थित्वा भणति ।

पूर्वाभिमुखोऽभवत् ॥ ३३ ॥ " सिद्धे नमंसिऊणं, + संसारत्था य जे महाविज्जा । वुच्छामि दंडकिरियं, सव्वविसनिवारणिं विज्जं ॥३४॥ " महावैद्या-महाव्रतधराः । सा चेयं विद्या-" सव्वं पाणाइवायं, पच्चक्खाइ त्ति अलिअवयणं च । सव्वं अदत्तादाणं, अब्बंभपरिग्गहं स्वाहा ॥ ३५ ॥ " उत्तस्थावेवमुक्ते स, मातापितृभिरोच्यत । अश्रद्दधानः पतितो, देवेनोत्थापितः पुनः ॥ ३६ ॥ पुनरप्यपसम्मूढो, देवेनोत्थापयत्यथ । प्रसादोत्थापितो भूयः, स्वजनैस्तत्रपश्यवान् ॥ ३७ ॥ आपृच्छ्य मातापितरौ, समं तेन जगाम सः । एकस्मिन् वनखण्डेऽथ, तस्याख्यत्प्राग्भवं सुरः ॥३८॥ बुद्धः प्रत्येकबुद्धोऽभू-ज्जातिस्मृत्याऽथ तत्क्षणात् । सज्जज्ञे भावचारित्रं, ययौ देवो यथागतम् ॥ ३९ ॥ एवं स तान् कषायादीन्, क्षिप्त्वा देहकरण्डके । नादात्सञ्चरितुं क्वापि, निजग्राहाखिलानपि ॥ ४० ॥ कषायेभ्यः प्रतिक्रान्तः, श्रामण्यमुपलभ्य च । गन्धर्वनागदत्तोऽथ, परमां निर्वृतिं ययौ ॥ ४१ ॥

अत्र परः प्राह-कथं निरतिचारैः प्रतिक्रम्यते ? आहाचार्यः-अत्र वैद्येन दृष्टान्तः—

एकस्य नृपतेरेक-स्तनुजोऽतीववल्लभः । स दध्यौ माऽस्य रोगोऽभू-च्चिकित्सां कारयामि तत् ॥१॥ आकार्य वैद्यानूचे सः, चिकित्सत सुतं मम । यथाऽस्य नैव रोगः स्या-दूचिरे तैः करिष्यते ॥२॥ राज्ञोचे कीदृशाः ? कस्य, योगा एकोऽवदत्ततः ।

---

+ संसारस्थाश्च ये महावैद्या केवलिचतुर्दशपूर्वधरादयस्तांश्च नमस्कृत्य वक्ष्ये दण्डक्रियां विद्यां, सा चेयं-प्रत्याख्याति एष महात्मेति । एवं भणित उत्थितः । न श्रद्दधाति, पुनः पतित स्तृतीयवेलायां मात्रादि दृष्ट्वा तेनैव समं चलितः । पूर्वभवश्रावणात्प्रतिबुद्धः प्रत्येकबुद्धो जातः । दीर्घपर्यायेण सिद्धः ।

प्रतिक्रमण-
हेतुगर्भः । ॥ २७ ॥

रोगाः स्युश्चेन्निवर्त्तन्ते, न स्युश्चेन्मारयन्ति( तम् )ते ॥३॥ द्वितीयः स्माह रोगश्चे-द्भवेत्तदुपशाम्यति। नोचेद्गुणं वा दोषो वा, न किञ्चिदपि कुर्वते ॥४॥ तृतीयोऽभिदधे रोगः, स्याच्चेत्तदुपशाम्यति । न स्याच्चेद्वर्णलावण्य-तया परिणमन्ति ते ॥५॥ राज्ञा तृतीयवैद्येन, कारिता वैद्यकक्रिया । नीरोगः समभूद्दिव्य-कायलावण्यवर्णभाक् ॥६॥ एवं अतिचाराभावेऽपि, स्याद्दोषश्चेद्विशुध्यति। न स्याच्चेच्चरणस्यैव, शुद्धिः शुद्धतरा भवेत् ॥ ७ ॥ इत्युक्तं निरतिचाराणामपि प्रतिक्रमण( करण )कारणं । एताः श्लोकमय्यो दृष्टान्तकथाः श्रीआवश्यकनिर्युक्तेर्लघुवृत्तितो लिखिता ज्ञेयाः । इति किञ्चिद्धेतुगर्भः प्रतिक्रमणक्रमविधिः समाप्तः ।

अनतिचार-
स्यापि
प्रतिक्रमणे
तृतीयौषध
निदर्शनम् ।

## ग्रन्थकृत्प्रशस्तिः ।

इत्थं सहेतुकयथाक्रमसूत्रयुक्त्या, साधुः प्रतिक्रमणकृत्विजकर्मजालम् ।
सद्यो विभिद्य श्रुतकेवलवित्क्रमेण, मुक्तिं भजेत भृशमक्षयसौख्यलक्ष्मीम् ॥ १ ॥

श्रीजयचन्द्रगणीन्द्रैः, प्रतिक्रमणविधिर्यथागमम् । लिखितस्तत्रोत्सूत्रं, यन्मिथ्यादुष्कृतं तस्य ॥ २ ॥

एवं श्रीयुतसोमसुन्दरगुरुश्रीपट्टपूर्वाचला-दित्यश्रीजयचन्द्रसूरिगुरुभिः श्रीमत्तपागच्छपैः ।
किञ्चिद्धेतुमयः प्रतिक्रमविधिर्वे रसद्योतिथि ( १५०६ )-संख्ये(दक्षजन)मन्दमतिप्रबोधविषये क्लृप्तश्चिरं नन्दतात् ॥ १ ॥

इति परमगुरुश्रीतपागच्छनायकश्रीजयचन्द्रसूरिकृतः प्रतिक्रमणहेतुगर्भः सम्पूर्णः ।

॥ २८ ॥

हारः पञ्चप्रमादी, मद्यादीनां, पञ्चप्रमादीं हरन्तीति पञ्चप्रमादीहराः । पुनः किंविशिष्टास्ते ? पञ्चाणुव्रतपञ्चसुव्रतविधिप्रज्ञापनासादराः, पञ्चाणुव्रतानि श्रावकाणां पञ्चसुव्रतानि साधूनां च, तेषां पञ्चाणुव्रतपञ्चसुव्रतानां विधि-राचारः पञ्चाचारस्तस्य प्रज्ञापनं-ज्ञापनं, तत्र पञ्चाणुव्रतपञ्चसुव्रतविधिप्रज्ञापने सादराः-सोत्साहाः । अथो-ऽथ अनन्तरं तथा पञ्चहृषीकनिर्जयं कृत्वा-पञ्चेन्द्रियनिग्रहं विधाय पञ्चमीं गतिं मोक्षगतिं प्राप्ताः ॥ २ ॥

पञ्चाचारधुरीणपञ्चमगणाधीशेन संसूत्रितं, पञ्चज्ञानविचारसारकलितं पञ्चेषुपञ्चत्वदम् ।
दीपाभङ्गुरुपञ्चमारतिमिरेष्वेकादशीरोहिणी-पञ्चम्यादिफलप्रकाशनपटुं ध्यायामि जैनागमम् ॥ ३ ॥

व्याख्या—अहं जैनागमं-वीतरागोपदिष्टं सिद्धान्तं ध्यायामि । किंविशिष्टं जैनागमं ? पञ्चाचारधुरीणपञ्चमगणाधीशेन संसूत्रितं, पञ्चाचारेण धुरीणः-समर्थो योऽसौ पञ्चमगणधरो-गणाधीशः सुधर्मस्वामी, तेन संसूत्रितं-विहितं । पुनः किंविशिष्टं जैनागमं ? पञ्चज्ञानविचारसारकलितं, पञ्च च तानि ज्ञानानि पञ्चज्ञानानि मत्यादीनि, तेषां पञ्चज्ञानानां विचारस्तस्य सारो-रहस्यं, तेन कलितं-सहितं । पुनः किंविशिष्टं जैनागमं ? पञ्चेषुपञ्चत्वदं, पञ्च इषवो-बाणा यस्य स पञ्चेषुः-कन्दर्पस्तस्य पञ्चत्वं-विनाशं प्रददातीति [पञ्चेषुपञ्चत्वदस्तं] पञ्चेषुपञ्चत्वदं । पुनः किंविशिष्टं जैनागमं ? दीपाभङ्गुरुपञ्चमारतिमिरेषु, गुरु-र्महान् योऽसौ पञ्चमारो गुरुपञ्चमारः-पञ्चमकालः स एव तिमिराणि गुरुपञ्चमारतिमिराणि, तेषु गुरुपञ्चमारतिमिरेषु दीपाभं-दीपसदृशं । पुनः किंविशिष्टं तं ? एकादशीरोहिणीपञ्चम्यादिफलप्रकाशनपटुं, एकादशीरोहिणी-पञ्चम्यादितपसां फलप्रकाशने पटुं-समर्थम् ॥ ३ ॥

पञ्चानां परमेष्ठिनां स्थिरतया श्रीपञ्चमेरुश्रियां, भक्तानां भविनां गृहेषु बहुशो या पञ्चदिव्यं व्यधात् ।
प्रह्वे पञ्चजने मनोमतकृतौ स्वारत्नपाञ्चालिका, पञ्चम्यादितपोवतां भवतु सा सिद्धायिका त्रायिका ॥ ५ ॥

व्याख्या—सा सिद्धायिका शासनदेवता पञ्चम्यादितपोवतां पुंसां त्रायिका–रक्षिका भवतु, आदिशब्दादेकादशीरोहिणी गृहीता । सा का ? या सिद्धायिका भविनां–भव्यानां गृहेषु बहुशो–वारंवारं पञ्चदिव्यं व्यधात्–अकरोत् । किंविशिष्टानां भविनां ? पञ्चानां परमेष्ठिनां अर्हदादीनां भक्तानां । किंविशिष्टानां पञ्चानां परमेष्ठिनां ? स्थिरतया श्रीपञ्चमेरुश्रियां, स्थिरतया–धैर्येण श्रीपञ्चमेरुवत्–मेरुगिरिपञ्चकवत् श्रियः–शोभा येषां ते [तथा, तेषां] श्रीपञ्चमेरुश्रियां । किंविशिष्टा सा ? प्रह्वे पञ्चजने मनोमतकृतौ स्वारत्नपाञ्चालिका, प्रह्वे–भक्ते पञ्चजने–मानवे मनोमतकृतौ–मनोऽभीष्टप्रदाने स्वारत्नपाञ्चालिका, स्वः–स्वर्ग[स्त]स्य रत्नं स्वारत्नं, तस्य स्वारत्नस्य–चिन्तामणिरत्नस्य पाञ्चालिका–पुत्तलिका, यथा चिन्तामणि पुत्तलिका मनोऽभीष्टं ददाति तथेत्यर्थः ॥ ५ ॥ इति पञ्चमीस्तुतिवृत्तिः समाप्ता ।

## श्रीपार्श्वनाथस्तुतिः

कमठाम्बुदवृष्टिसमाधिभरा–ऽमरभूरुहपल्लवकान्तिचुरा । जिनपार्श्व ! तवोपरि भाति फणा, नवरत्नरुचिप्रचयैररुणा ॥ १ ॥
जिनसंहतिरस्तु मुदे भविनः, खलु सज्जनमज्जनसत्कृतिनः । प्रविकासितदुग्धपयोधिरिवा, दिवि तारकता प्रतिपद्य युता ॥ २ ॥
वरिवस्यत जैनमताम्बुपतिं, [ नयभंगगभोरुगभीरतनिम् ] श्रुतदुर्गतिरत्नवितानिकरं । पुरुषोत्तमसेवितगोनिकरम् ॥ ३ ॥
कुरुते कुरुते वत आम्बुरुहं, विकृते निभृतालिनिलासगृहम् । वरपुस्तकसन्महनाधिश्रियो, भुवनार्चितवागिरमव्ययधियो ॥ ४ ॥

गच्छे खरतरेऽभूवन्, सुविशुद्धक्रियाऽन्विते । मुनिमोहनलालाख्याः, क्रियोद्धारविधायकाः ॥ १ ॥

# इति प्रतिक्रमणहेतुगर्भः समाप्तः ।

तच्छिष्यशिष्यपंन्यास–गणिकेशरसन्मुनेः । शिष्यं हि गणिबुद्ध्यब्धिं, ते शं यच्छन्त्वहर्निशम् ॥ २ ॥